This is a book which in Saṁvat 1296 = A.D. 1240, certain pilgrims from Nâgpur,* whose names are given, having heard the scriptures expounded "here in Vîjapur,*" in the paushadhaśâlâ, or Hall of Fasting, by *Devendrasûri*, *Vinayachandrasûri*, and *Devabhadragaṇi*, and having considered that the world is nought, caused to be written for the use of the faithful.

No. 58.—Abhayadevasûri's commentaries on the sûtras of the four aṅgas.

The date of the composition of this work is given as Saṁvat 1120=A.D. 1064: and it deserves note that the present copy was written Saṁvat 1184=A.D. 1128, only sixty-four years later. *Abhayadevasûri* finished the book in Aṇahila-pâtak, in the Dusserah of the year mentioned, and in correcting it he was assisted by a host of pandits of whom *Droṇa* is singled out as the chief.

No. 60.—The Bhuvanasundarikathâ of Vijayasiṁhasûri.

The author of this book *Vijayasiṁhasûri* who wrote in Saṁvat 1365= A.D. 1300, calls himself the pupil of *Samudrasûri;* and he refers to the works of *Pâdalipta*, *Bappabhaṭṭi*, and *Haribhadra*.

---

* Both cities in Gujarath.

Digitized by Google

No. 62.—Śilângasûri's commentary on the Âchârângasûtram.

This manuscript was written in Saṁvat 1303=A.D., 1247, when Vîsalâdeva was king in Aṇahila-pâtak, for the use of this great minister Tejaḥpala.

No. 111.—Vivekamañjarî of Âsaḍa.

In the last lines of his book *Âsaḍa* is called the son of Raja *Kaṭuka*, the ornament of the race of Bhillamâla. Bhillamâla is the Sanskrit form of the name of the town now called Bhinmal in Marwar. Âsaḍa wrote in the year whose sign is the eight vasus, the four oceans, and the twelve suns, *i. e.* 1248=A.D. 1192.

No. 120.—The Kaviśikshâ of Jayamaṅgalâchârya.

This is a hand-book for poets, written by a Jain at the time when the great Jayasiṁha was king (A.D. 1094=1143) His book contains at least one verse which should not be allowed to perish :—

न कवित्वमधर्माय मृतये दंडनाय वा ।
कुकवित्वं पुनः साक्षान्मृतमाहुर्मनीषिणः ॥

"It is no sin not to write verses ; for that a man need neither die nor take a beating : but to write bad verses, this is a fault in the eyes of all wise men."

No. 130.—The — — — mâlapagaranakahâ.

This fragment preserves for us the fact that *Jinabhadramuni*, pupil of Śâlibhadra, wrote in [Saṁvat 1204=A.D 1148.

No. 149.—Siddhasenasûri's commentary or Nemichandra's Pravachansaroddhâra.

A complete copy of the work already noticed under No. 41. The text ends with a Jain rendering of the Roman poet's

"dum Capitolium
Scandet cum tacita virgine pontifex,"

which the commentator is at some pains to reconcile with the indifference that befits a saint :—

जाव जुइं भुवणत्तयमेयं रविससिसुमेरुगिरिजुत्तम् ॥
पवयणसारुद्धारो ता नंदउ बउ पढिज्जंतो ॥ ६ ॥

Digitized by Google

इह यद्यपि यद्भवितव्यं तदेव भवति तथापि शुभाशुभफलस्वाच्छोभनार्थे प्रशंसा विधेयेति दर्शनार्थमायशसां [दर्शनार्थ माशंसां] कुर्वन्नाह यावदेतद्विजयते भुवनत्रयं स्वर्गमर्त्यपाताललक्षणं रविशशिमेरुगिरियुक्तं दिनकरतुहिनकरसुरगिरिपरिगतम् तावदयं प्रवचनसारोद्धारग्रंथो बुधैस्तत्त्वावबोधबंधुरबुद्धिभिः पठ्यमानो नंदतु शिष्यप्रशिष्यपरंपराप्रचारितरूपां समृद्धिमासादयतु ॥

*Yaśodevasûri*, *Nemichandrasûri* and *Vijayasenasûri*, were three pupils, in that order, of *Âmradevasûri*, who was the pupil of *Jinachandra*.

No. 122.—The Śobhana-stuti.

The last book I can refer to here enjoys a great reputation among the Jains, but to our minds must present a melancholy specimen of perverted ingenuity. It is a poem in ninety verses so constructed that the second and fourth lines of each verse agree, to the letter, in sound, but present a different sense. The author, *Śobhanâchârya*, is said to have been the brother of Dhanapâla.

Before closing this Report I desire, as one of the officers placed by Government in charge of the search for Sanskrit manuscripts in the Bombay Circle, to enter my protest against the view that the work may, so far as the Bombay Circle is concerned, be held to be nearing its term. It is under this, or some similar impression, I am persuaded, that Government have been induced to sanction the diversion, to purposes not originally contemplated, of little less than half the grant assigned by the Government of India "for the discovery and preservation of the records of ancient Sanskrit literature."* In Dr. Bühler's time that sum stood, as originally fixed by the Government of India for Bombay, Rajputana, Central India, and the Central Provinces, at Rs. 8,000. The first raid upon this by no means extravagant sum was

* I quote this definition of the purposes of the search from the Government of India Resolution in the Home Department of 9th February 1878. How little it is the case that the preparation of a catalogue raisonnée was one of the main objects for which the search was originally ordered by the Government, will be best seen if I reproduce here the opening paragraphs of that Resolution :—

"RESOLUTION.—At the instance of Pandit Rádhákrishṇa, of Lahore, a scheme was sanctioned by a Resolution in the Home Department, dated 3rd November 1868, for the discovery and preservation of the records of ancient Sanskrit literature at an outlay of Rs. 24,000 per annum. The chief features of the scheme were as follows :—

Digitized by Google

committed by Dr. Burgess, who succeeded in diverting Rs. 1,500 to his work on inscriptions. In November, 1881, "when on the point of leaving India," Dr. Kielhorn formally advised Government that the diminished grant of Rs. 6,500 was a great deal too much for the purpose in hand; and that the Rs. 2,000 required for his scheme for a catalogue raisonnée of the Poona collection might be taken from

---

(1) "To print uniformly all procurable unprinted lists of the Sanskrit manuscripts in Indian libraries, and to send them to the various learned Societies of Europe, and to individual scholars in Europe and India, with an intimation that the Government will carefully attend to their suggestions as to which of the manuscripts therein mentioned should be examined, purchased, or transcribed;

(2) "to institute searches for manuscripts, and to this end to prepare lists of desirable codices; to distribute these lists among scholars and other persons willing to assist in the search, with a request that they will report their discoveries to such officer as may, from time to time, be appointed by the Government of India; and to depute competent scholars on tours through the several Presidencies and Provinces to examine the manuscripts reported upon, to seek new manuscripts, to purchase manuscripts procurable at reasonable rates, and to have copies made of such manuscripts as are unique or otherwise desirable, but which the possessors refuse to part with; and

(3) "to grant to the Asiatic Society of Bengal an additional allowance for the publication of Sanskrit works hitherto unprinted.

The statement given in the margin shows the financial result of the scheme, *i.e.*, how the Rs. 24,000 sanctioned as the annual expense for carrying it out are distributed."

| | Tour expense of competent scholars. | Purchase of manuscripts. | Transcription of manuscripts. | TOTAL. |
|---|---|---|---|---|
| | Rs. | Rs. | Rs. | Rs. |
| Bengal | 1,000 | 1,000 | 1,200 | 3,200 |
| Bombay | 1,000 | 1,000 | 1,200 | 3,200 |
| Madras and Mysore | 1,000 | 1,000 | 1,200 | 3,200 |
| North-Western Provinces | 500 | 500 | 600 | 1,600 |
| Punjab | 500 | 500 | 600 | 1,600 |
| Oudh | 500 | 500 | 600 | 1,600 |
| Central Provinces | 500 | 500 | 600 | 1,600 |
| Rajputana | 1,000 | 1,000 | 1,200 | 3,200 |
| | 6,000 | 6,000 | 7,200 | 19,200 |
| Printing Native catalogues of desirable manuscripts | ... | ... | ... | 1,000 |
| Additional grant to Asiatic Society | ... | ... | ... | 3,000 |
| Sundries | ... | ... | ... | 800 |
| | | | | 24,000 |

After a review of the several results, the Government of India resolved that these warranted *a prosecution of the search.*

the grant without prejudice to the objects for which the grant was sanctioned. "The allotment of Rs. 2,000 for cataloguing purposes," Dr. Kielhorn wrote, "will leave only Rs. 4,500 for the purchase of new manuscripts. But in my opinion this sum will now, when unknown or desirable manuscripts become rarer every day, and after I have secured for Government many of the ancient palm-leaf MSS. known to exist, be amply sufficient, and I venture to point out that the proper cataloguing of the manuscripts which Government possesses is as important a matter as the acquisition of new manuscripts, and was one of the main objects for which the search was originally ordered by the Government of India."*

I am persuaded that no one who is himself actively engaged in the search for manuscripts in India will homologate the views here expressed, in so far as they point to the desirability of contracting our efforts for the discovery and purchase of unknown works, or of better copies than those already secured of known works. To me it seems that the time is ripe for effecting even more than has yet been done; and that Dr. Bühler's great success in India, and the acquisition of palm-leaf MSS., to which Dr. Kielhorn is here referring, are an incentive rather than a discouragement to future effort.

In two important respects the existing conditions are certainly more favourable than those in which Dr. Bühler had at first to work. Thanks to an enlightened encouragement of secondary education, we have, scattered over the country, a body of men who have learnt Sanskrit in our colleges, and who, I am confident, want only leading and encouragement, to explore libraries in numbers vastly greater than the officers in charge of the search can hope to undertake, with an energy and intelligence which may be trusted to secure good results. And it is also, I think, true that the old feeling of jealousy as to the motives and objects of Government in making this search is dying out. That feeling, in so far as the educated classes are concerned, was by no means either unnatural or unjustifiable at the time when the search was first ordered, and when a Secretary to the Council of the Governor-General was found urging that everything

* Dr. Kielhorn's letter to the Director of Public Instruction of 30th November 1881, as given in Government Resolution in the Educational Department No. 2053, 27th December 1881.

Digitized by Google

obtained in working out the scheme should be "sent to Europe."* It is now generally understood that the work is not being prosecuted on lines with which no one could reasonably expect a native scholar to sympathise; and we have year by year in greater force the active support of the educated classes throughout the country. The unreasoning prejudice raised on religious grounds is dying more slowly; but in that respect, too, matters are steadily improving. And I need not say that when that last obstacle vanishes, results may confidently be looked for of supreme importance.

In these circumstances it will be readily understood that it is matter of great regret to me personally that, after long waiting, I find myself put in part charge of the work of travelling and purchasing books over a district which comprises nearly a third of the peninsula, with a yearly grant for all expenses of Rs. 2,225.† I venture respectfully to urge that the sum is altogether inadequate; and to express the hope that arrangements may be possible for restoring the grant to the amount originally sanctioned out of Imperial revenues. I would fain hope, also, that it may be found possible to elicit, in favour of an undertaking that has the support of the most enlightened of the native community, that public spirit in the private citizen which has never been wanting in Bombay. I have in this connection to tender here my best thanks to the Bombay Branch of the Royal Asiatic Society for permitting this Report to appear as a number of their Journal, and for contributing towards the expense of its publication.

* "To Europe we should send everything obtained in working out this scheme,—original MSS., copies, extracts; for in Europe alone are the true principles of criticism and philology understood and applied, and, fifty years hence, in Europe alone will any intelligent interest be felt in Sanskrit literature. There will then, it is safe to say, be as few Sanskrit scholars in India as there are now Greek scholars in Greece."—Note by Mr. Whitley Stokes. See Gough's Records of Ancient Sanscrit Literature, p. 5.

† Mr. Bhaṇḍarkar and I have had the disposal of Rs. 6,500 during the year under report. But that was due to the fact that as yet nothing has had to be paid towards the catalogue scheme.

Digitized by Google

# ग्रन्थोद्धृतानि

## नं० २६ कामाक्षीस्तुतिशतककम्—मूककविः प० ४१

आ० श्रीकामाक्षीदेव्यै नमः

बध्नीमो वयमंजलिं प्रतिदिनं बंधच्छिदे देहिनां
कंदर्पागमतंत्रमूलगुरवे कल्याणकेलीभुवे ॥
कामाक्ष्याघनसारपुंजरजसे कामद्रुहश्चक्षुषां
मंदारस्तवकप्रभामदजुषे मंदस्मितज्योतिषे ॥ १ ॥

च० ज्योतिष्कणेभ्योनमः १००
इति श्रीमूककविसार्वभौमकृतौ मंदस्मितज्योतिर्वर्णननाम शतकं संपूर्णम् ॥

आ० महिम्नः पंथानं मदनपरिपंथिप्रणयिनि
च० चिद्रूपकलया ॥ ९९ ॥
इति श्रीमूककविसार्वभौमेन कृतं पादारविंदशतकं संपूर्णम्

आ० कारणपरचिद्रूपा कांचीपुरसीम्नि कामपीठगता ॥
च० पीयूषधोरणी दिव्या ॥ १०० ॥
इति श्रीमूककविविरचिते आर्याशतकं संपूर्णम्

आ० मोहांधकारनिवहं विनिहंतुमीडे
च० अयमेव भेदः ॥ १०० ॥
इति श्रीमूककविसार्वभौमकृतौ कटाक्षशतकं संपूर्णम्

आ० पांडित्यं परमेश्वरि स्तुतिविधौ नैवाश्रयंते गिरां
च० तपोविपिनधाविनं सततमेव कांचीपुरे
विहाररसिका पुरा परमसंविदुर्वीरुहे ॥
कटाक्षनिगडैर्दृढं हृदयदुष्टदंतावलं
चिरं नयतु मामकं त्रिपुरवैरिसीमंतिनी ॥ १०० ॥

इति श्रीमूककविसार्वभौमकृतौ श्री कामाक्षीस्तुतिशतकं संपूर्णम् ॥

## नं० ३१ काव्यप्रकाशः प० ६४

अन्ते ॥

संपूर्णमिदं काव्यलक्षणम् ॥ ॥
इति श्रीकाव्यप्रकाशेर्थालंकारनिर्णयोनाम दशम उल्लासः ॥ १० ॥

J

इति श्रीभट्टराजानकमम्मटयोः कृतिः काव्यप्रकाशकः काव्यदोषगुणालंकार-निरूपणग्रंथः समाप्तः ग्रंथाग्रसंख्या ॥ २५०० ॥

······गणि नयविजयाह्वो लेखयामास रम्यम् ॥ ३ ॥
शशिशिवनयनाब्धिश्वेतवाहोन्मितस्य
बहुलबहुलपक्षे वत्सरस्य प्रधाने ॥
यदरुणपुरमध्ये पुस्तकं रम्यवर्णं
मुदमिदमिह दत्तां तद्विपश्चिद्द्विजेभ्यः ॥ ४ ॥

## नं० ३२ काव्यप्रकाशटीका प० १२८

आदिः

ढुंढिसंज्ञमभिनौमि सिद्धिदं विघ्नराजमभिसुंदराधरम् ॥

आंध्रदेशे वत्सगोत्रीयरामेश्वरस्तत्सुतो नरसिंहभट्टस्तत्सुतो मल्लिनाथस्तत्सुतो नारायणो ज्येष्ठः कनीयान् सुतो नरहरिः ॥

सवसु ग्रह हस्तेन ब्रह्मणा समलंकृते ।
काले नरहरेर्जन्म कस्य नासीन्मनोरमम् ॥ १३ ॥

विचार्य सर्वं सुखमेव दुःखं सुधामये ब्रह्मणि लोलुपस्य ।
संन्यस्यतस्तस्य बभूव सार्था सरस्वतीतीर्थ इति प्रसिद्धिः ॥ १५ ॥

काश्यां सरस्वतीतीर्थमतिना तेन रच्यते ।
टीका काव्यप्रकाशस्य बालचित्तानुरंजिनी ॥ १७ ॥

## नं० ३३—काव्यप्रकाशटीका प० २९६

अन्ते

सिद्धिरिति शुभम् ॥ इति श्रीममाटाचार्यविरचिते काव्यप्रकाशे राजानकानन्दकृते काव्यप्रकाशदर्शनेऽपरनाम्नि अर्थालंकारनिदर्शनो नाम दशम उल्लासः

इत्येषमार्गो विदुषां विभिन्नोप्यभिन्न एकः प्रतिभासते यत् ॥
न तद्विचित्रं [त्रं] यदमुत्र सम्यग् विनिर्मिता संघटनैव हेतुः ॥

विदुषां ध्वनिकृत्प्रभृतीनां य एष मार्गः स्वसिद्धान्तसिद्धान्तस्तद्ग्रन्थगतं तेन पृथक्पृथगवस्थितोप्येकरूपतया प्रतिभाति तत्र संघटनैव तिमितम् विक्षिप्तस्य सुखावबोधायैकत्र संग्रहणं या संघटनैतद्द शादेकात्मताप्रतिभासत् एतेन च महामतीनां प्रसरणहेतुरेषग्रंथः ग्रंथकृतानेन कप्यकथितमप्यसमाप्तता दपरेण च पूरितावशेषत्वाद्द्विखंडोपि अखंडतया यदवभासते तत्र संघटनैव माधो हेतुः नहि सुघटितस्य संधिबंधः कदाचिल्लक्ष्यतेत्यर्थशक्त्या ध न्यते यदुक्तं ॥

कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः ।
प्रबन्धः पूरितः शेषोविधायालढ [क] सूरिणा इति
अन्येनापि उक्तम्
काव्यप्रकाशदह [श] कोपि निबन्धकृद्भ्यां
द्वाभ्यां कृतेपि कृतिवां [नां] रसतत्वलाभः ॥
लोकेस्ति विश्रुतमिदं नितरां रसालं
वन्ध [बंध] प्रकाररचितस्य तरोः फलं य[त्]
संपूर्णोयं काव्यप्रकाशग्रन्थः ॥

## नं० ६७ चारुचर्याशतकम्—क्षेमेन्द्रः प० ७

ॐ नमः शिवाय ॥

श्रीलाभसुभगः सत्यासक्तः स्वर्गापवर्गदः ।
जयतात्त्रिजगत्पूज्यः सदाचार इवापरः ॥ १ ॥
ब्राह्मे मुहूर्ते पुरुषस्त्यजेन्निद्रामतंद्रितः ।
प्रातः प्रबुद्धं कमलमाश्रयेच्छ्रीर्गुणाश्रया ॥ २ ॥

. . . . . . . . . . . . . . .

न कुर्वीत क्रियां कांचिदनभ्यर्च्य महेश्वरम् ।
ईशार्चनरतं श्वेतं नाभून्नेतुं यमः क्षमः ॥ ४ ॥

. . . . . . . . . . . . . . .

नोत्तरस्यां प्रतीच्यां वा कुर्वीत शयने शिरः ।
शय्याविपर्ययाद्गर्भोदितेः शक्रेण पातितः ॥ ६ ॥
अर्थिभुक्तावशिष्टं यत्तदश्नीयान्महाशयः ।
श्वेतोर्थिरहितं भुक्त्वा निजमांसाशनोभवत् ॥ ७ ॥

. . . . . . . . . . . . . . .

मातरं पितरं भक्त्या तोषयेन्न प्रकोपयेत् ।
मातृशापेन नागानां सर्पसत्रेभवत्क्षयः ॥ १६ ॥

. . . . . . . . . . . . . . .

स्त्रीजितो न भवेद्धीमान् गाढरागवशीकृतः ।
पुत्रशोकाद्दशरथो जीवं जायाजितोत्यजत् ॥ २६ ॥

. . . . . . . . . . . . . . .

न कदर्यतया रक्षेल्लक्ष्मीं क्षिप्रपलायिनीम् ।
युक्त्या व्याडींद्रदत्ताभ्यां हृता श्रीनंदभूभृतः ॥ ४६ ॥

. . . . . . . . . . . . . . .

Digitized by Google

प्रभुप्रसादे सत्याशां न कुर्यात् स्वप्नसन्निभे ।
नंदेन मंत्री निहितः शकटालोहिबंधने ॥ ५५ ॥

. . . . . . . . . . . . .

यत्नेन शोषयेद्दोषान्न तु तीव्रव्रतैस्तनुम् ।
तपसा कुंभकर्णोभून्नित्यनिद्राविचेतनः ॥ ६१ ॥

. . . . . . . . . . . . .

विडंबयेन्न वृद्धानां वाक्यकर्मवपुःक्रियाः ।
श्रीसुतः प्राप वैरूप्यं विडंबिततनुर्मुनेः ॥ ६३ ॥

. . . . . . . . . . . . .

उद्वेजयेन्न तैक्ष्ण्येन रामाः कुसुमकोमलाः ।
सूर्योभार्याभयोच्छित्यै तेजो निजमशातयत् ॥ ७८ ॥
पद्मवन्न नयेत्कोशं धूर्त्तभ्रमरभोज्यताम् ।
सुरैः क्रमेण नीतार्थैः श्रीहीनोभूत्पुरांबुधिः ॥ ७९ ॥

. . . . . . . . . . . . .

बंधूनां वारयेद्दूरं नैकपक्षाश्रयो भवेत् ।
कुरुपांडवसंग्रामे युयुधे न हलायुधः ॥ ८८ ॥
परोपकारं संसारसारं कुर्वीत सत्ववान् ।
निदधे भगवान् बुद्धः सर्वसत्वोद्धृतौ धियम् ॥ ८९ ॥

. . . . . . . . . . . . .

जन्मावधि न तत् कुर्यादंते संतापकारि यत् ।
सस्मारैकशिरःशेषः सीताक्लेशं दशाननः ॥ ९४ ॥

. . . . . . . . . . . . .

श्रव्या श्रीव्यासदासेन समासेन सतांमता ।
क्षेमेंद्रेण विचार्येयं चारुचर्या प्रकाशिता ॥ १०० ॥

इति श्रीमन्महेश्वराचार्यवर्यक्षेमेंद्रकृतमुपदेशशतकं चारुचर्याभिधं समाप्तम् ॥

## नं० ८१ दशकुमारचरितदीपिका प० १५

सिद्धिश्री गणपतये नमः

आ० अभिवाद्य सहस्रांशुं तमोघ्नं लघुदीपिका ।
कुमाराणां दशानां च चरितस्य प्रकाश्यते ॥ १ ॥
श्रुत्वेति । वृत्तांत प्रकारः । चंद्रकइति·········
च० कोशलाभिजनत्वात् कोशलवंशजत्वात् ॥ ॥

इति श्रीदशकुमारचरितविवरणे अष्टम उछ्वासः ॥

Digitized by Google

## नं० ९१—देवीस्तोत्रम् प० १५

आदि ॐ नमो गुरवे

रत्नाकराभ्यन्तरतो गृहीत्वालंकारसूत्राणि यथाक्रमेण ॥
बंदीव देव्या गिरिराजपुत्र्याः करोमि शंसं श्रुतिगोचराणि ॥
श्रीत्रयीश्वरमित्रात्मजश्रीशोभाकरमित्रविरचिते अलंकाररत्नाकरेलंकारसूत्राणि
आमुखेकारूपदं पुनरुक्तवदाभासम् ॥ १ ॥
क्षमावनी लोकजनार्त्तिहानी द्युमस्तुपर्वेद्रविणार्थदात्री ॥
व्यनक्तु सिंहार्तु [ नु ] पदांघ्रिरुच्चैरुमाम्बिका मे दयया महोत्सवम् ॥
अत्र क्षमा अवनी इति लोक जन इति आर्ति हानि इति न्यु [ द्यु ] मस्तुपर्वे इति द्रविण अर्थ इति पदअंघ्रि इति उमा अम्बिका इति महउत्सव इति आमुख्ये एकार्थत्वं वस्तुतस्तु पर्यवसानेन्यार्थत्वेन पुनरुक्तवदाभासं नामालंकारः अनन्वितादाच्यत्वं कायादेत्वं प्रकल्पिते मुख्यार्थबाधसम्बंधफलाभावान्नक्ष्यता असंबंधाभिधायित्वप्रसंगाद्यंगनापि न अत्र मस्य चार्थस्य न धर्मः पुनरुक्तता पुनरुक्तोपि वा तत्वे स एव स्यादलंकृतिः पौनरुक्त्यमलंकारस्तेनानर्थस्य कस्यचित् इति परिकरश्लोकः पुनरुक्तवदाभासं
तुल्यरूपवृत्तियमकं ॥ २ ॥
तुल्यरूपत्वं स्वरव्यंजनसमुदायगतस्य क्रमस्य तुल्यत्वे भवति ॥
कंपात् कृतांतस्य कृतानुकंपा कंपाति नो यांघ्रि नतेंद्रकंपा ॥
कालीव संतापहरापि काली काली नृणां सत्फलदास्तु काली ॥
॥ यमकम् ॥ २ ॥

### अलंकारसूत्राणि यथाक्रमेण.

१ आमुखे [ख्ये] कारू [र्थे] पदं पुनरुक्तवदाभासम् ॥
२ तुल्यरूपवृत्ति यमकम् ॥
३ द्वयोर्द्वयोः साम्यं छेकानुप्रासः ॥
४ अन्यथा छेकानुप्रासविपरीतो वृत्त्यनुप्रासः ॥
५ तुल्याभिधेयभिन्नतात्पर्यशब्दावृत्तिर्लाटानुप्रासः ॥
६ पद्मादिलिपिवर्णवच्चित्रं च चित्रम् ॥
७ उपमानोपमेयस्य सादृश्यमुपमा ॥
८ कल्पितेन कल्पितोपमा ॥
९ तेनैव तदेकदेशेन तदन्वितभेदेनवा (न) न्वयः ॥
१० तद्विरहादसमः ॥

Digitized by Google

११ परस्परमुपमानोपमेयत्वमुपमेयोपमा ॥
१२ सामान्योद्दिष्टानामेकस्य निदर्शनमुदाहरणम् ॥
१३ अन्योन्यधर्मयोगार्थमौपम्यं प्रतिमा ॥
१४ सकृद्धर्मस्य निर्देशे प्रस्तुतानामप्रस्तुतानां वा तुल्ययोगिता ॥
१५ मिश्राणां दीपकम् ॥
१६ वाक्यद्वये सकृत्प्रतिवस्तूपमा ॥
१७ प्रतिबिंबभावेनावस्थानमर्थमौपम्यं दृष्टांतः ॥
१८ असति संबंधे निदर्शना ॥
१९ सदृशानुभवात्स्मरणे स्मृतिः ॥
२० अन्यासंगात्कौतुकविनोदोविनोदः ॥
२१ अनुभवस्मृत्यादि प्रत्यूहोव्यासंगः ॥
२२ अर्थादितस्याधिकगुणत्वं तदेकोव्यतिरेकः ॥
उपमेयप्रतिकूलतोपमानस्य विवक्ष्यते स द्वितीयः ॥
२३ सजातीयस्यातद्धर्मत्वं च व्यतिरेकः ॥
२४ अधिकगुणस्यानादरः प्रतीपम् ॥
२५ उद्दिष्टस्य पक्षतयानुनिर्देशोवैधर्म्यम् ॥
२६ आरोपोरूपकम् ॥
२७ नियतधर्महानां [नौ] चारोप्यमाणस्यातिसाम्यमभेदः ॥
२८ प्रकृतोपयोगित्वे परिणामः ॥
२९ विषयस्यमुख्यस्यवापह्नवेन्याविधिरपह्नुतिः ॥
३० तस्यापि संदिह्यमानत्वे संहेहः ॥
३१ संभावितसंभाव्यमानापोहो वितर्कः ॥
३२ विषयत्वेन संभावनमुत्प्रेक्षा ॥
३३ अन्यरूपतया निश्चयो भ्रात्य [न्ति] मान् ॥
३४ एकस्याप्यनेकधा कल्पनमुल्लेखः ॥
३५ संभाव्यमानस्य प्रतिमा ॥
३६ यद्यर्थव्यक्ताव्यक्तसमानस्य क्रियातिपत्तिः ॥
३७ अध्यवसानमतिशयोक्तिः ॥
३८ अप्रस्तुतादन्यप्रतीतिरप्रस्तुतप्रशंसा ॥
३९ स्तुतिनिंदाभ्यां व्याजस्तुतिः ॥
४० प्रतिपक्षादिसंबंधिस्वीकारः प्रत्यनीकम् ॥
४१ प्रत्यनीकं चित्सदसत्वे विनोक्तिः ॥
४२ सहार्थवशादेकस्यानेकसंबंधे सहोक्तिः ॥

Digitized by Google

४३ विशेषणानां साम्यादप्रस्तुतधर्मावच्छेदः समासोक्तिः ॥
४४ विशेष्यस्यापि साम्येद्वयोर्वाच्यत्व [त्वं] श्लेषः ॥
४५ साभिप्रायत्वं परिकरः ॥
४६ सापेक्षत्वादुपादानेनान्यप्रतिभंग्यंतरेणवाभिधानं पर्यायोक्तम् ॥
४७ विहितस्याशंकितस्यवाविशेषावगमाय निषेधो निश्चयः ॥
४८ इष्टनिषेधआक्षेपः ॥
४९ अनिष्टविधानं विघनाभासः ॥
५० संदिह्यमानयोरेकत्रतात्पर्येछा संदेहाभासः ॥
५१ विकल्पितयोर्विकल्पाभासः ॥
५२ विरुद्धाभासत्वं विरोधाभासः ॥
५३ हेत्वभावे फलोत्पत्तिर्विभावना ॥
५४ हेतुसाकल्ये फलानुत्पत्तिर्विशेषोक्तिः ॥
५५ तयोर्देशकालान्यत्वमसंगतिः ॥
५६ रूपधर्मयोः परस्परनिबंधनत्वमन्योन्यम् ॥
५७ धर्मिभावस्य धर्माणां च नियमोविपर्ययः ॥
५८ अविलक्षणाद्विलक्षणकार्योत्पत्ति पर्येश्चाचिंत्यम् ॥
५९ अर्थानर्थतदन्यस्योक्तिर्विषमम् ॥
६० तद्विपर्ययः समम् ॥
६१ विफलः प्रयत्नोविचित्रम् ॥
६२ अनाधारमाधेयमेकमनेकगोचरं संभाविताद्धि-
कस्य विरुद्धस्य संपत्तिश्च विशेषः ॥
६३ त [उ] त्पत्तिर्विनाशयो पायन्ये व्याघातः ॥
६४ प्रतिबंधकादेर्विधानासामत्कृ [र्थ्ये] मशक्यम् ॥
६५ दोषगुणयोरन्यथात्वं वृ [व्य] त्यासः ॥
६६ तदन्याभ्यां समाधानं समाधिः ॥
६७ सजातीयविजातीयापेक्षया तुछत्वम् । [तूद्रेकः] ॥
६८ विवृत्तावन्यादयस्तुल्यम् ॥
६९ अप्रास्यर्थं तु तुल्यानादरोनादरः ॥
७० त्यक्तस्वीकार आदरः ॥
७१ हेत्वंतरादन्यस्यापि तथात्वं न [त्वम] नुकृतिः ॥
७२ प्राप्तस्य प्रतिबंधः प्रत्यूहः ॥
७३ स्थितस्यान्यथापत्तिः प्रत्यादेशः ॥
७४ उपोद्वलनं समाधिः ॥

Digitized by Google

७५ विशेषस्यांतरेण समर्थनमर्थांतरन्यासः ॥
७६ सवा-संभवोसंभवोव्याप्तिः ॥
७७ साधनात्साध्यप्रतीतिरनुमानम् ॥
७८ परप्रत्यायिकं लिंगं हेतुः ॥
७९ गतनिष्ठाप्रतिपादनमापत्तिः ॥
८० दंडिपूपिकया पातनमर्थापत्तिः ॥
८१ असंभाव्यहेतुफलप्रेषणं विधिः ॥
८२ अन्यनिषेधार्थोपि विधिर्नियमः ॥
८३ प्राप्तस्य परिसंख्या ॥
८४ प्रत्यापत्तिः प्रतिप्रसवः ॥
८५ नानाफलप्रयुक्तः प्रयत्नस्तंत्रम् ॥
८६ प्रसंगादन्यार्थः प्रसंगः ॥
८७ विरुद्धयोस्तुल्यत्वे पाक्षिकत्वं विकल्पः ॥
८८ धर्मयौगपद्यमन्यस्यापितत्करत्वं समुदायः ॥
८९ विनिमयः परिवृत्तिः ॥
९० क्रमेणैकमनेकत्रान्यथा वा पर्यायः ॥
९१ आरोहावरोहादिमः [क्रमः] ॥
९२ रूपधर्माभ्यामाधिक्यं वर्द्धमानकम् ॥
९३ विपर्ययो (व) रोहः ॥
९४ संभावनयान्यथावातिशयोतिशयः ॥
९५ उत्तरोत्तरस्य पूर्वपूर्वानुबंधित्वविपर्ययो वा शृंखला ॥
९६ अन्यधर्मस्वीकारस्तद्गुणः ॥
९७ धर्मसाम्याद्भेदप्रतीतिर्मि (मी) लितम् ॥
९८ अस्यां कुतश्चिद्विवेकोविवेकः ॥
९९ अनुभूतस्य प्राथे [प्रार्थ्ये] स्यांतरोपलब्धौ परभागः ॥
१०० निरूढस्य प्रतिभेद उद्भेदः ॥
१०१ गूढमा [ढा] कांक्षोपनिबद्धो गूढम् ॥
१०२ सूक्ष्मार्थवचनं सूक्ष्मम् ॥
१०३ उद्भेदप्रच्छादन [नं] व्याजोक्तिः ॥
१०४ अन्यथा संभावितयोः शब्दार्थयोरन्यथा योजनं वक्रोक्तिः ॥
१०५ सम्यग्स्वभावोक्तिः ॥
१०६ विप्रकृष्टस्य प्रत्यक्षायमाणत्वं भाविकम् ॥
१०७ उदात्तचरितागमु दात्तम् ॥

Digitized by Google

. . . . . . . . . .

अन्ते
उदात्तं

प्रद्युम्नस्य चकार यत्र गिरिजा श्रीशारिकानुग्रहं
नद्या यत्र वराहलोच [न] भुवां मारी सरिं संगता ॥
राजा सप्रवराभिधो हरिगिरिर्यातः सदेहो यतः
तिष्ठंस्तत्र पुरे यशस्करकविस्तुष्टाव रोगीति [च]

श्रीशोभाकरसूत्रार्थस्वलोहामात्रघट्टनमीर्निर्मितं रत्नकंठेन देवीस्तोत्रं त्रेचारुणि ॥

इति श्रीकाश्मीरदेशवास्तव्यश्रीयशस्करविरचितमलंकारोदाहरणनिबद्धं देवीस्तोत्रं संपूर्णं समाप्तम् ॥

## नं० १३७ मुक्तालताशतकम्—शम्भुमिश्रः प० १३

आ० ॐ श्रीगणेशाय नमः

मानं मुंच विपंचि पंचमरवन्यक्कारपारंगमा
माभूवन् कलकंठकंठकुहरे कुंठक्रमास्ते गिरः ।
प्राप्तः पंचशरप्रपंचशरणं यद्भृंगभंगीगुरु-
बंधूकप्रियबांधवो धवलितश्यामाधवो माधवः ॥ १ ॥

अ० या लक्ष्मीः स्मरकार्मुके स्फुरति या बाल्ये प्रवाले रुचि-
र्यो नीलांबुरुहच्छदे मृदुमरुत्प्रेंखोलिते विभ्रमः ।
या कांतिः कनकांबुजेपि सकलं द्रष्टुं तदेकत्र चे-
च्चेतः कंदलिताद्भुतं तव सखे पश्याननं सुभ्रुवः ॥ १०९ ॥

शंभुमिश्रकृता मुक्तालता समाप्ता ॥

## नं० १५३—रसेन्द्रचूडामणिः—सोमदेवकृत प० ६० अपूर्णः ।

आदिः - - - - - - - - - - - - -

गोमांसभक्षामरसीधुपानाग्विध्वस्तपापानतिमुक्तितापान् ॥
तान् कौलिकान्नौमि सदेहमुक्तान् [सदेहमुक्तान्] हसतः सदैव ॥
गोशब्देनोदिता जिह्वा तत्प्रवेशो हि तालुनि ॥
गोमांसभक्षणं तत्तु महापातकनाशनम् ॥
जिह्वाप्रवेशसंभूता वह्निनोत्पादिता खलु ॥
चांद्रः श्रवति यस्तारः सा स्यादमरवारुणी ॥
तत्पानं द्वारशब्देन देहसिद्धिं करोति हि ॥



Digitized by Google

एषैव खेचरी मुद्रा चिराभ्यासेन सिद्ध्यति ॥
प्रकृत्यादिधरांतो यश्चतुर्विंशतिको गुणः ॥
तत्कुलं तेन दीपित यो जीवः स हि कौलिकः ॥
रसैर्वाभ्यासयोगेन कल्पस्थायी कुले नहि ॥
सर्वैश्वर्यगुणोपेतः कौलिकोसौ महेश्वरः ॥
पंचभूतसमूहात्मा नास्तिको वेदनिंदकः ॥
पंचत्वमुक्तवादी च सहि पाषंडकौलिकः ॥
तस्मात्पाषंडमुत्सृज्य शिवोक्तां कौलिकीं क्रियाम् ॥
संसेव्य साधयेन्मर्त्यो जीवन्मुक्तिं परांपराम् ॥

इति श्रीकरवालभैरवपुरवरपतिश्रीसोमदेवविरचिते रसेंद्रचूडामणौ रससूत्रस्थाने रसमहिमानिरूपणं नाम प्रथमोध्यायः

······इति द्वितीयोध्यायः

······इति तृतीयोध्यायः

कथ्यते सोमदेवेन मुग्धवैद्यप्रबुद्धये ।
परिभाषा रसेंद्रस्य शास्त्रैः सिद्धैश्च भाषिता ॥

······इति चतुर्थोध्यायः

अथ यंत्राणि वक्ष्यंते रसतंत्राण्यनेकशः ।
समालोक्य समासेन सोमदेवेन सांप्रतम् ॥

······इति पंचमोध्यायः

मंथानभैरवमहागम-प्रादिष्टा दिव्यौषधीर्वदति संप्रति सोमदेवः ॥
वार्द्धक्यरोगहरणाय रसायनाख्या सूतेंद्रबंध – – जारण कर्मणीष्टाः

······इति षष्ठोध्यायः

कथ्यते सोमदेवेन सांप्रतं दर्शितो रसः ।
श्रीकंठागमनिर्दिष्टा विशिष्टारससाधने ॥

इति सप्तमोध्यायः

अथ औषधीगुणाः

सर्पाक्षी वंध्यकर्कोटी जलबिंबी ·········································

अपूर्णः

**नं० १५४ राजेंद्रकर्णपूरः शम्भुकविः प० ५**

॥ श्रीगणेशाय नमः ॥

बद्धस्पर्द्धः क्षितिधरसुताभ्रूलतावक्रतायां
भूयाद्भूत्यै तव हरशिरःशेखरो रोहिणीशः ।

Digitized by Google

यं निष्पीड्य स्तनमुखनखोल्लेखरेखासु देव्याः
संभोगांते वितरति सुधास्पंदमर्द्धेंदुमौलिः ॥ १ ॥
चौडीचूडाभरणहरणः कीर्णकर्णावतंसः
कर्णाटीनां मुषितमुरलीकेरलीहारलीलः ।
कुर्वन्नुर्वीतिलक तिलकोत्सिचलाटीललाटं
जीयादेकस्तव नवयशः स्वर्णशाणः कृपाणः ॥ ६ ॥
किंचान्यद्वसुधापुंरदर पुरस्त्वत्पौरुषस्य क्वचि-
न्नार्हत्यस्खलितक्रमोपि गगने त्रैविक्रमो विक्रमः ॥ ८ ॥
जहाति नगरीं गलत् [स्वकर] कंकणः कौंकणो
वनं विशति विव्हल स्खलितकुंतलः कुंतलः ।
किमन्यदुदितक्रुधि त्वयि मृगेंद्रभीमारवं
तटं विशति मारवं च्युतरमालवोमालवः ॥ १२ ॥
तस्थौ कंपतरंगितस्तनतटं बाष्पांबुधौताधरं
शोकाक्रांतकपोलकीलितकरं द्यां मुंजराजे गते ।
संजाते त्वयि हारिहारवलयक्वाणं क्वणत्कंकणं
चंचत्कांचनकांचि सा भगवती नर्नर्त्ति वाग्देवता ॥ १७ ॥
शेष क्लेशमशेषमुत्सृज भज त्वं कूर्म कर्म स्वकं
स्वैरं खेलत सिंधुसैकतलताकुंजेषु दिक्कुंजराः ।
अप्येतां सकुलाचलां सनगरां सांभोनिधिं सापगां
सद्वीपां च भुवं बिभर्त्ति हि भुजः श्रीहर्षपृथ्वीभुजः ॥ १९ ॥
श्लाघा राघव लाघवं तव गता दुष्यंत विश्वं तव
म्लानिं याति यशोगता तव तथा पार्थ प्रथापार्थताम् ।
जातेस्मिन् गुणिबांधवे नरपतिश्यामाधवे माधवे
कस्याप्यत्र न कर्णे कर्णपदवीं याता भवत्कीर्त्तयः ॥ ४४ ॥
कूर्म धैर्यं शिथिलय धृतिं मुंच शेषस्य शेषा-
माशामाशाकरिषु वसुधे देवि मा मा दधीथाः ।
शक्तः सप्तांबुनिधिपरिखामेखलामप्ययं त्वां
वोढुं मौर्वीकिणपरिचितोभूपतेरस्य बाहुः ॥ ६६ ॥
पीयूषद्रवहारिणी सुमनसां भ्रूलास्यविस्तारिणी
त्वत्सेवाभिरवापि काप्यभिनवा वाग्देवते भारती ।
अस्त्येका तु कृतांजलेर्जननि मे शंभोरियं प्रार्थना
मद्वाचां क्वचिदस्तु वस्तुनिपुणः श्रोता सचेतोजनः ॥ ७५ ॥
इति काश्मीरदेशोद्भवशंभुकविविरचितो राजेंद्रकर्णपूरः समाप्तः ॥

Digitized by Google

## नं० १५९ काव्यालंकारः—सटीकः—रुद्रटः—नमिः

टी० यथोद्देशस्तथा लक्षणमिति वास्तवलक्षणमाह

वास्तवमिति यद्वस्तुस्वरूपकथनं क्रियते तद्वास्तवमिति ज्ञेयं वस्तुन इदं वास्तवमिति कृत्वा इतिशब्दोर्थनिर्देशो वास्तवशब्दवाच्यः सोर्थ इत्यर्थः पुष्टार्थग्रहणमपुष्टार्थे निवृत्त्यर्थं तेन

गोरपत्यं बलीवर्द्दस्तृणान्यत्ति मुखेन सः ॥
मूत्रं मुंचति शिश्नेन अपानेन तु गोमयम् ॥

अस्य वास्तवत्वं न भवति अविपरीतग्रहणं विवक्षितविपरीतार्थस्य वास्तवत्वनिवृत्त्यर्थं यथा

दंतान् निर्दलयद्रसां च जडयत्तालु द्विधा स्फोटय-
त्याज्यः संघटयद्गलं गलदिलादंत्राणि संकोचयत् ॥
इत्थं निर्मलकर्करीस्थमसहप्रालेयवातासहं
नाधत्याः प्रचुरं पिबंत्यनुदिनं प्रोन्मुक्तधारं पयः ॥

अत्र हि पयसः शीतलत्वमाल्हादकत्वं च विवक्षितं तद्वैपरीत्यं च प्रतीयते निरुपमादिग्रहणं त्वनुवादमात्रं न तूपमातिशयश्लेषाणां वास्तवत्वनिवृत्तये पृथगुपादानादेव तेषामन्यत्वसिद्धेः ॥ १०

## नं० १६५ वक्रोक्तिपञ्चाशिका—सटीका मू० रत्नाकरः, टी० बल्लभदेवः प० ११

श्रीगणेशाय नमः

टी० आ० वागीश्वरीं नमस्कृत्य गणानां च तथेश्वरम् ।
वक्रोक्तिवर्णने रात्ने पंजिका क्रियते लघु [ः] ॥ १ ॥

मू० आ० सव्यालंबनमेतदद्य भवतो निस्नेह मुंचाम्यहं
सव्यालं विजहीहि सुंदरि वनं निःस्नेहता नास्ति मे ।
मैवं वक्ष्यसि किं वनं ननु जलं मूर्द्ध्ना मयैवोह्यते
वक्रोक्त्येति हिमाद्रिजामवचसं कुर्वन् हरः पातु वः ॥ १ ॥

टी० सव्यालंबनं वामभागावस्थानं सव्यालं व्यालैर्दुष्टसत्त्वैः सहितं वनं च दंत्योष्ठ्ययोर्हि शब्दालंकारेषु यमकवक्रोक्त्यादिषु न तथा कवयो भेदग्राहिणः मैवं कुटिलं कस्य वनविवक्षा इत्यर्थः वक्ष्यसि कथयिष्यसि धारयिष्यसि च वहप्रापणे धातो. वनं काननं जलं च अवचसं जित्वा निर्वचनाम् ॥ १ ॥

Digitized by Google

च० वक्रोक्तिपंचाशतिमित्थमेनां यो भावयेन्मत्सररिक्तबुद्धिः ।
स्पष्टोत्तरासूक्तिषु काव्यबंधे भवेत्सरत्नाकरवत्प्रवीणः ॥ ५१ ॥

भावयेद्विचारये [त्] स्पष्टमुत्तरं यासु तादृशीषूक्तिषु वक्रोक्तिषु काव्यबंधे सुभाषितविषये रत्नाकरः अयमेव कविवरः हरविजयकाव्यकारस्तद्वत्प्रवीणः कुशलः स्यात् ॥ ५१ ॥

सुनूरानंददेवस्य रणभूव्योम्नि भास्वतः ॥
वक्रोक्तिवर्णनेरात्ने टिप्पनं वल्लभो व्यधात् ॥

इति श्रीबालवृहस्पत्यनुजीविनो वागीश्वरांकस्य विद्याधिपत्यपरनाम्नो हरविजयमहाकाव्यकर्तुः काश्मीरदेशोद्भवराजानकश्रीरत्नाकरमहाकविकृतौ वक्रोक्तिपंचाशिकायाममात्यवरानंददेवसूनुशिशुपालवधाद्यनेककाव्यटीकाकर्तृश्रीवल्लभदेवकृतं टिप्पणकं संपूर्णम् ॥ .

## नं० २१२ साम्बपञ्चाशिका—सटीका—मू० साम्बः टी० क्षेमराजः प० २९

आदिः

॥ ॐ नमः सरस्वत्यै ॥

ॐ पुष्णन् देवानमृतविसरैरिन्दुमाप्लाव्य सम्यग्
भाभिःस्वाभीरसयति रसं यः परं नित्यमेव ।
क्षीणं क्षीणं पुनरपि च तं पूरयत्येवमीदृग्
दोलालीलोल्लसितहृदयं नौमि चिद्भानुमेकम् ॥ १ ॥
एतदावेशवैवश्यप्रोन्मिषद्धिषणा वयम् ॥
विमृशामो मनाक् श्रीमत्सांबपंचाशिकास्तुतिम् ॥
सोयं परामृशरसो रसज्ञैरिह रस्यताम् ॥
आयुष्याज्यामृतस्पर्शः शतपद्याहि शांतये ॥
समस्तागममहाम्नायपरमरहस्यविन्महायोगी [गि] सहस्रसंप्रदायसंपूर्णः श्रीसांबः स्वात्मविवस्वत्स्तुतिं जगतोनुग्रहाय वक्तुमुपक्रमते ॥

मू० शब्दार्थत्वविवर्त्तमानपरमज्योतीरुचो गोपतेः
मूलोपान्त्यश्लोकः
भक्तिश्रद्धाद्यखिलतरुणीवल्लभेनेदमुक्तं
श्रीसांबेन प्रकटगहनं स्तोत्रमध्यात्मगर्भम् ।
यः सावित्रं पठति नियतं स्वात्मवत्सर्वलोकान्
पश्यन् सोंते व्रजति शुकवन्मंडलं चंडरश्मेः ॥ ५२ ॥

Digitized by Google

टी०—कीदृशेन सांबेन भक्तिश्रद्धे आदी यासां तत्वार्थचिंतादीनां ताएवाखिलास्तरुण्यो नवनवाः सुंदर्यस्तासां वल्लभेन क्षणमपि परिहर्त्तुमशक्येन प्रेयसा रूपलावण्यातिशयमात्रात् समस्तबाह्यरमणीयेन इत्यनेन व्यतिरेकलभ्येनार्थेन भगवद्वासुदेवसुतत्वमात्मनः प्रकटयति ॥ ५२ ॥

उपसंहारभंग्या जनाननुजिघृक्षुराशास्ते

अन्त्यश्लोकः

मू० इति परमरहस्यश्लोकपंचाशिकैषा
तपननवनपुण्या सागमब्रह्मचर्या ।
हरतु दुरितमस्मद्वर्णिताकर्णिता वो
दिशतु च शुभसिद्धिं मातृवद्भक्तिभाजाम् ॥ ५३ ॥

टी०—इत्युक्तक्रमात्······कश्चिच्छैवः परशिवसमावेशगाढानुरागोद्रेकस्फूर्जन्नभिनवदशावेशवैवश्यशाली

सत्स्तोत्रेस्मिन्विवृतिरचनां क्षेमराजोऽन्ययुंक्तेत्येतन्नैवं झटिति घटितं दर्शनीयं हि सद्भिः ॥

इति श्रीसांबपंचाशिकाविवरणं कृतं श्रीमहामहेश्वराचार्यवर्याभिनवगुप्तपादपंकजोपजीविना राजानकक्षेमराजमधुपराजेनेत्योम् ॥

## नं० २२२ सुवृत्ततिलकम्—क्षेमेन्द्रः प० १८

यथा कलशस्य

अंजलौ जलमधीरलोचना लोचनप्रतिशरीरशारितम् ।
आत्तमात्तमपि कांतमुक्षितुं कातरा शफरशंकिनी जहौ ॥

यथा भट्टवल्लटस्य

वरमिह रवितापैः किं न शीर्णासि गुल्मे
किमु दवदहनैर्वा सर्वदाहं न दग्धा ।
यदहृदयजनौघैर्वृत्तवर्णानभिज्ञै-
रितरकुसुममध्ये मालति प्रोंभितासि ॥

यथा गंदिनकस्य

करतरलितबंधं कंचुकं कुर्वतीनां
प्रतिफलितमिदानीं दैपमाताम्रमर्चिः ।
स्तनतटपरिणाहे भामिनीनां भविष्य-
न्नखपदलिपिलीलासूत्रपातं करोति ॥

यथा वीरदेवस्य

तव शतपत्रपत्रमृदुताम्रतलश्चरण-
श्चलकलहंसनूपुरवरध्वनिना मुखरः ।

Digitized by Google

माहिषमहासुरस्य शिरसि प्रसभं निहितः
सकलमहीधरेंद्रगुरुतां कथमंब गतः ॥

यथा साहिलस्य

कचग्रहमनुग्रहं दशनखंडनं मंडनं
दृगंचनमवंचनं मुखरसार्पणं तर्पणम् ।
नखार्दनमतर्दनं दृढमपीडनं पीडनं
करोति रतिसंगरे मकरकेतनः कामिनाम् ॥

यथा भट्टश्यामलस्य

धृतो गंडाभोगे मधुप इव बद्धोब्जाविवरे
विलासिन्या मुक्तो बकुलतरुमापुष्पयति यः ।
विलासो नेत्राणां तरुणसहकारप्रियसखः
स गंडूषः सीधोः कथमिव शिरः प्राश्यति मधोः ॥

यथा लाटडिंडीरस्य

चित्रं तावदिदं सुरेंद्रभवनान्मंदाकिनीपाथसा
केनाप्युत्तमतेजसा नृपतिना क्ष्मामंडलं मंडितम् ।
नातश्चित्रतरं निशाकरकलालावण्यदुग्धोदधे
भूमेर्यद्भवता विरिंचनगरी कीर्त्तिप्लवैः प्लाव्यते ॥

यथा रिस्सोः

स्नातुं वांछसि किं मुधैव धवलक्षीरोदफेनच्छटा
च्छायाहारिणि वारिणि द्युसरितो डिंडीरविस्तारिणि ।
आस्ते ते कलिकालकल्मषमषीप्रक्षालनैकक्षमा
कीर्त्तिः संनिहितैव सप्तभुवनस्वच्छंदमंदाकिनी ॥

यथा चक्रस्य

सत्यं पातालकुक्षिंभरि चिरविलसद्दिक्करिप्रीणिताभ्रं
श्रीगर्भश्वभ्रमभ्रंलिहलहरि हरिस्थानमप्येव किंचित् ।
कल्पांते व्याप्तविश्वं परिरटति सरिन्नाथ पाथस्त्वदीयं
किंत्वेतत्कुंभयोनेः करकुहरदरीपूरमाचामतोभूत् ॥

क्षेमेंद्रस्य पवनपंचाशिकायाम्

प्रेंखच्छंखाभिघातस्फुटदखिलचलच्छुक्तिनिर्मुक्तमुक्ता
मुक्तव्यक्ताट्टहासाः स्मरनृपसकलद्वीपसंचारचाराः ।
सर्पत्कर्पूरपूरप्रवणकरचितापूर्वदिक्कर्णपूरा
धावंत्याध्मातविश्वा रतविधुतवधूबंधनोगंधवाहाः ।

Digitized by Google

## नं० २३२ अजित० प० १९

आदौ अजियं जियसव्वभयमित्यादि

मू० च० ३६ गाहा तं मोएउ नंदि पावेउ य नंदिषेणमभिनंदिं ॥
परिसाइवि सुहनंदिं भय य दिसउ संजमे नंदिं ॥ ३७ ॥

मू० टी० व्याख्या० तत् युगलं मोदयतु हर्षयतु च नंदिं समृद्धिं लोकानां प्रापयतु च नंदिषेणं स्तुतिकारं श्रेणिकपुत्रमन्यं वा नंदिं वा अभिनंदिं अभिसमृद्धिं प्रापयतु पर्षदोपि सुखसमृद्धिं दिशतु इतीहापि योज्ये मम च स्तोत्रकर्तुः दिशतु ददातु संयमे प्रमोदसमृद्धिं ॥ ३७ ॥ मूलवृत्तानि एतान्येवाजितशांतिस्तवो व्याख्यातः ॥

संप्रति अन्यकर्तृकमपि गाथाद्वयं व्याख्याति

परयेत्यादि ...... ३९ श्री नंदिषेणमुनिविरचिताजितशांतिस्तवावचूर्णिः संपूर्णा ॥

## —भयहरस्तोत्रम्—सटीकम्

आ० मू० ॥ नमिऊण पणयसुरगणचूडामणिकिरणरंजिअं मुणिणो ।
चलणजुअलं महाभयपणासणं संथवं वोछम् ॥ १ ॥

आ० टी० ॥ श्रीपार्श्वस्वामिनं नत्वा मानतुंगगुरोः कृतौ ।
वृत्तिं भयहरस्तोत्रे सूत्रयामि समासतः ॥ १ ॥
विद्यामंत्रोद्धाराः पूर्वाचार्यैः प्रदर्शिता यस्मिन् ।
ते च चिरंतनवृत्तेर्ज्ञेयास्तानिह न वक्ष्यामः ॥ २ ॥
तत्रादावाचार्यः शिष्टसमयपरिपालनाय........

मू० च० ॥ जो पढइ जो य निसुणइ ताणं कइणोय माणतुंगस्स ॥
पासो पायं पसमेउ सयलभुवणच्चियच्चलणो " २१ ॥

इति श्रीपार्श्वनाथस्तोत्रम्

टी० च० सकलग्रहणमिति गाथात्रयार्थः ॥ २१ ॥
भयहरस्तवने (वि) वृतिर्मया व्यरचि किंचन मंदधियाप्यसौ ।
अनुचितं यदवोचमिह क्वचित्तदनुगृह्य विशोध्यमृषीश्वरैः ॥ १ ॥
वृत्तिरेषा विशेषोक्तिरोचिष्णुश्चारुचेतनै (:)
चर्च्यतां चिररात्राय नाम्नाभिप्रायचंद्रिका ॥ २ ॥
संवद्विक्रमभूपतेः शरत्रतुदर्चिर्मृगांकैर्मिते
पौषस्योज्ज्वलपक्षिभाजि रविणा युक्ते नवम्यां तिथौ ।
शिष्यः श्रीजिनसिंहसूरिसुगुरोष्टीकामकार्षी मिमां
श्रीसाकेतपुरे जिनप्रभ इति ख्यातो मुनीनां प्रभुः ॥ ३ ॥
समाप्तोयं भयहरस्तववृत्तेरभिप्रायश्चंद्रिका नाम कृतिः
श्रीमज्जिनप्रभसूरीणाम् ॥

Digitized by Google

## नं० २३४ अनेकार्थकैरवाकरकौमुदी प० २१०

आ. ॥ अर्हं ॥

परमात्मानमानम्य निजानेकार्थसंग्रहे ।
वक्ष्ये टीकामनेकार्थकैरवाकरकौमुदी(म्) ॥ १ ॥
विश्वप्रकाशशाश्वतरभसामरसिंहमंखदुर्गानाम् ॥
व्याडिधनपालभागुरिवाचस्पतियादवादीनाम् ॥
शास्त्राणि वीक्ष्य शतशो धन्वंतरिनिर्मितं निघंटुं च ॥
लिंगानुशासनानि च क्रियतेनेकार्थटीकेयम् ॥ ३ ॥

च. अन्यथा भूयांसोप्यर्थाः संति यदाहुः ॥ निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः ॥ अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥ इत्याचार्यहेमचंद्रसूरि-विरचितायामनेकार्थकैरवाकरकौमुदीत्यभिधानायामनेकार्थसंग्रहटीकायामनेकार्थ - शेषोव्ययकांडः समाप्तः ॥

श्रीहेमसूरिशिष्येण श्रीमन्महेंद्रसूरिणा ।
भक्तिनिष्ठेन टीकेयं तन्नाम्नैव प्रतिष्ठिता ॥ १ ॥
सम्यग्ज्ञाननिधेर्गुणैरनवधेः श्रीहेमचंद्रप्रभो
ग्रंथे व्याकृतिकौशलं व्य [व] सति (तत्) कास्मादृशां तादृशम् ।
व्याख्यामः स्म तथापि तं पुनरिदं नाश्चर्यमंतर्मन-
स्तस्याजस्रमपि स्थितस्य हि वयं व्याख्यामनुब्रूमहे ॥ २ ॥
यल्लक्ष्यं स्मृतिगोचरे समभवद्दृष्टं च शास्त्रांतरे
त (त्रा) षे समदर्शि किंतु कतिचित् नो दृष्टलक्षाः कचित् ।
अभू[भ्यू]ह्यं स्वयमेव तेषु ससुखैः शब्देषु लक्ष्यं बुधै-
र्यस्मात्संप्रति तुच्छकश्मलधियां ज्ञानं कुतः सर्वतः ॥ ३ ॥
एकत्रापि कृताभिधेयविषये व्युत्पत्तिरर्थांतरे
कर्त्तव्या स्वयमेव दर्शितदिशा निर्बंधवंध्यैर्बुधैः ।
वर्ण्णाद्यक्रमवर्णनं च न शुभं तत्रापि कार्यं स्वयं
यद्वक्तृप्रतिपादने न विकृतिः कामं वरीवृद्ध्यते ॥ ४ ॥
परिपूर्णा ………… नेकार्थसंग्रहटीकानेकार्थके …………
कौमुदीत्यभि ……… ॥ ७ ॥

## नं० २६० चतुःशरणप्रकीर्णकम्—सावचूरि प० ८ प० ५

अर्हं नमः

मू० आ०

सावज्जजोगविरइ १ उक्कित्तण २ गुणवउ अ पडिवत्ती ३ ॥
खलिअस्स निंदणा ४ वणतिगिछ ५ गुणधारणा चेव ६ ॥ १ ॥



Digitized by Google

टी० आ० इदमध्ययनं परमपदप्राप्तिबीजभूतत्वात् श्रेयोद्भुतं अतस्तदारंभे ग्रंथकृन्मंगलरूपसामायिकाद्यावश्यकार्थकथन १ भावस्त्वमंगल [भावमलं] कारणद्रव्यमंगलभूतगजादि १४ स्वप्नोच्चारव्याजसर्वतीर्थकृद्गुणस्मरण २ वर्तमानतीर्थाधिपतिश्रीवीरनमस्करण ३ रूपमंगलत्रयमाह ॥ सावज्जेति ॥ अथवा षडावश्यकयुतस्यैवप्रायश्चतुःशरणप्रतिपत्त्यादियोग्यता स्यात् अतः प्रथमं षडावश्यकमाह । सावज्जेत्यादि । सहावद्येन पापेन वर्त्तंते इति सावद्याः योगा मनोवाक्कायव्यापारास्तेषांविरतिर्निवृत्तिः सावद्ययोगविरतिः सामायिकेन क्रियते इत्यध्याहारः उत्कीर्त्तनं जिनगुणानामुत्कीर्त्तना चतुर्विंशतिस्तवेन क्रियते गुणा ज्ञानदर्शनचारित्राद्याः ते विद्यंते येषां ते गुणवंतो गुरवस्तेषां प्रतिपत्तिर्भक्तिः गुणवत्प्रतिपत्तिः सा वंदनकेन क्रियते स्खलितं आत्मनोतिचारापादनं तस्य निंदनं निंदना न पुनःकरिष्यामीत्यभ्युपगमनं सा प्रतिक्रमणेन क्रियते व्रणस्यातीचाररूपभावव्रणस्य चिकित्सा प्रतिकाररूपा सा कायोत्सर्गेण क्रियते गुणा विरत्यादयो मूलगुणोत्तरगुणरूपां तेषां धारणं धारणा सा प्रत्याख्यानेन क्रियते चैवेति षण्णामपि समुच्चये ॥ १ ॥

मू० च० इय जीव पमायमहारिवीर भद्दं तमेवज्झयणम् ॥
झाए मु तिसंझमवंझकारणं निव्वुइसुहाणम् ॥ ६३ ॥

इति चतुःशरणप्रकीर्णकम् ॥

टी० च० अथ प्रस्तुताध्ययनोपसंहारमाह ।

इयजीव० इति उक्तप्रकारेण हेजीवात्मन् एतदध्ययनं ध्याय स्मर त्रिसंध्यं संध्यात्रये इति संबंधः कथंभूतं पमायमहारिवीरं प्रमादा एव महांतोरयः शत्रवश्चतुर्दशपूर्वधरादीनामपि निगोदादिदुर्गतिपातहेतुत्वात् प्रमादस्य तेषां प्रमादमहारीणां विनाशाय वीरवद्वीरं सुभटकल्पमित्यर्थः अनुस्वारलोपः प्राकृतत्वात् पुनः कथंभूतं भद्रमंते यस्मात्तद् भद्रांतं मोक्षप्रापकमित्यर्थः अथवा हे वीर हे भद्रेति संबोधनपदद्वयं जीवस्योत्साहवृद्धिहेतु अंतामिति जीवितांतं यावदेवैतदध्ययनं ध्यायेत्यर्थः पुनः किंभूतं अवंध्यकारणं सफलकारणं केषां निवृत्तिर्मोक्षस्तत्सुखानामिति जीय इति पाठे जितप्रमादमहारि(:) योसौ वीरभद्रसाधुः वीरसत्कचतुर्दशसहस्रसाधुमध्यवर्ती तस्येदं जित० तदेतदध्ययनं ध्यायेत्यादि । एवं शास्त्रकर्त्तुः समासगर्भमभिधानमुक्तं अस्य चाध्ययनस्य वीरभद्रसाधुकृतत्वज्ञापनेन यस्य जिनस्य यावंतः साधवः प्रत्येकबुद्धा अपि एव प्रकीर्णकान्यपि तावंति भवंतीति ज्ञापितं भवतीति गाथार्थः ॥ इति चतुःशरणप्रकीर्णकावचूरिः सम्मत्तं शास्त्रं ॥ संवत् १६४९ वर्षे भाद्रपद मासे शुक्लपक्षे नवम्यां तिथौ रविवारे ॥ मु । साधुविजय ॥

Digitized by Google

## नं० २९९ जगत्सुन्दरीयोगमाला त्रु०

हरिषेणपण्डितः निउत्तव्वम् ॥ ३३३ ॥ ॥ इति पंडितश्रीहरिषेणेन मया योनिप्राभृतालाभे स्वसमयपरसमयवैद्यकशास्त्रसारं गृहीत्वा जगत्सुंदरीयोगमालाधिकारः विरचितः इति ॥ ७ ॥

सर्वौषधिरिद्धिसंयुक्तं । १ । कांत्तारकोसं । आश्चर्यमहोदधिकरणिकारत्नरत्नाकरं । यंत्रमातृकाविश्वकर्म्म---भव्यजनोपकारकारकं । मिथ्यादृष्टिणिरसणपटीयसं । ----ज्वरभूतशाकिनीध्वांतमार्त्तंडं । समस्तनिमित्तशास्त्रोत्पत्तियोनिं । विद्वज्जनचित्तचमत्कारं । पंचमकालसंज्ञं । सर्वविद्याधातुवादादिविधानं । जनव्यवहारचंद्रचंद्रिकाचकोरं । आयुर्वेदरक्षितसमस्तसत्वं । प्रश्नश्रवणमहामुनिकुष्मांडिनीमहादेव्या उपदिष्टं । पुष्पदंतादिभूतबलिसिष्यदृष्टिदायकं । इत्थं भूतं योनिप्राभृतं ग्रंथं । ७ । कलिकाले सव्वन्हू जो जाणइ जोणिपाहुडं गंथं ----७का---मनीहननृणामर्हन्मतेस्याद्रति यद्येषः प्रियधर्म्मकः पृथुयशाः श्रीपूज्यपादो गुरुः------प्रमोद्भूतचिंतामणिं योणिप्राभृतसंज्ञशास्त्रममलं देवासुराभ्यर्च्चितम् ॥ ८ ॥ तावन्मिथ्यादृशां तेजो मंत्रयंत्रादिषु स्फुटम्---शृर्ण्वति धीमतः ॥ ९ ॥ इति श्रीमहाग्रंथं योनिप्राभृतं श्रीपन्हश्रवणमुनिविरचितं समाप्तम् ॥ ॥७॥ संवत् १५८२ वर्षे शाके १४४७ प्रवर्त्तमाने---लिषितम् ॥

## नं० ३०० प्राकृतप्रबोधः–नरचन्द्रसूरिः प० ११

आ० ॐ नमः सरस्वत्यै ॥ नमः श्रीगणेशाय ॥
प्रणम्य परमं ज्योतिर्द्योतिताशेषवाङ्मयम् ॥
सिद्धहेमाष्टमाध्याय रूपसिद्धिर्विधीयते ॥ १ ॥

इह च यथा संस्कृतलक्षणे धातुप्रत्ययादिसिद्धायां प्रकृतौ पश्चाद्विभक्त्या विधिस्तथा प्राकृतलक्षणेपि प्रायः प्राकृतलक्षणसिद्धां प्रकृतिमाधाय तदनंतरं विभक्त्यादिक्रिया कर्त्तव्या नान्यथा रूपसिद्धिः क्रमभंगप्रसंगात् ॥ अथ प्रा० ॥ कैअवं । कगचतदपयवां प्रायोलुगिति तलुकि सिः तस्याः क्लीबे स्वरान्मुसेरिति म तस्य मोनुस्वार इत्यनुस्वारः

च० डम्मिडेः ॥ ३२८ ॥

इति मलधारिशिष्यश्रीनरेंद्रसूरिविरचिते प्राकृतप्रबोधे चतुर्थः पादः समाप्तः ॥
नानाविधैर्विधुरितां विबुधैः स्वबुद्ध्यातां रूपसिद्धिमवलोक्य (नतैः स्व) शिष्यैः ॥
अभ्यर्थितो मुनिरनुज्झितसंप्रदायमारंभमेनमकरोन्नरचंद्रनामा ॥ १ ॥
एवं ग्रंथाग्रं १५०० ॥ संवत् १६४५ वर्षे वैशाख वदि १३ शुक्रे श्रीवटपद्रमहानगरे लिखापितम् ॥

Digitized by Google

## नं० ३५१ सम्यक्त्वसप्ततिका—सटीका. प० १३३

आ० टी० ॥ अर्हम् ॥ नमः सर्वज्ञाय ॥

सच्चामीकरबंधुरोद्धरतरस्कंधस्फुरद्दोर्लतः

. . . . . . . . . . . . .

सिद्धांतोन्नतिशालिनो नयचयप्रोर्जस्विगर्जाजुष [:]
च्छंदोव्याकरणप्रमाणसुमहःसौदामिनीमालिनः ।
धिन्वंतो निखिलं धरित्रिवलयं व्याख्यामृतोद्वर्षणैः
श्रीमंतो गुणशेखराख्यगुरवो नंदंत मेघा इव ॥ ५ ॥
ढिल्यां साहिमहंमदं शककुलक्ष्मापालचूडामणिं
येन ज्ञानकलाकलापमुदितं निर्माय षट्दर्शिनी ।
प्राकाश्यं गमिता निजेन यशसा साकं स सर्वागम-
ग्रंथज्ञो जयताज्जिनप्रभगुरुर्विद्यागुरुर्नः सदा ॥ ८ ॥
एतेषां गुणशालिनां पदपयोजन्मद्वयीसेवनात्
संजाताधिगमः स संघतिलकाचार्यो जडोप्यंजसा ।
पूर्वाचार्यकृतेर्विचारचतुरज्ञातार्थसार्थोद्धृतेः
सम्यक्त्वाग्रगसप्ततेर्विवरणं कर्त्तास्मि संक्षेपतः ॥ ९ ॥

प्रकटीकृतामृतायमानसदुपदेशसारः प्रकरणकारः प्रज्ञावज्ञातसुराचार्यः कश्चित् पूर्वाचार्य (:) अपहस्तितसमस्तदुर्गतिमहादंभे सम्यक्त्वसप्ततिकाभिधानशास्त्रारंभे·········· प्रथमगाथामाह । दंसणसुद्धिपयासम्

टी० च० दुःकृतं मम ॥ २ ॥

इति श्रीरुद्रपल्लीयगच्छगगनमंडनदिनकरश्रीगुणशेखरसूरिपट्टावतंसश्रीसंघतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्वकौमुदीनाम्न्यां सम्यक्त्वस्थानषट्कस्वरूपनिरूपणो नाम द्वादशोधिकारः समाप्तः ग्रंथाग्रं ५३६अ० २९

समाप्ता चेयं सम्यक्त्वसप्ततिकावृत्तिस्तत्वकौमुद्यभिधाना ॥

अथ प्रशस्तिः ॥

श्रीवीरशासनमहोदधितः प्रसूतः
प्रोद्यत्कलाभिरभितः पृथितः प्रथिव्याम् ।
प्राद्यन्महः प्रसरनाशिततामसोस्ति
श्रीचंद्रगच्छ इति चंद्र इवाद्भुतश्रीः ॥ १ ॥
तत्रासीद्धरणेंद्रवंद्यचरणः श्रीवर्द्धमानो गुरु-
स्तत्पट्टे च जिनेश्वरः सुविहितश्रेणीशिरःशेखरः ।

Digitized by Google

तच्छिष्योभयदेवसूरिरभवद्नवांगीमहा
वृत्तिस्तंभनपर्श्वनाथजिनराट्मूर्त्तिप्रकाशैककृत् ॥ २ ॥

तत्पट्टपूर्वाचलचूलिकायां भास्वानिव श्रीजिनवल्लभाख्यः ।
सच्चक्रसंबोधनसावधनबुद्धिः प्रसिद्धो गुरुमुख्य आसीत् ॥ ३ ॥

तच्छिष्यो जिनशेखरो गणधरो जज्ञेतिविज्ञोग्रणी-
स्तत्पादांबुजराजहंससदृशः श्रीपद्मचंद्रः प्रभुः ।
तत्पट्टांबुधिवर्द्धनः कुवलयप्रोद्यत्प्रबोधैकधीः
श्रीमान् श्रीविजयेंदुरिंदुवदभूच्छश्वत्कलालंकृतः ॥ ४ ॥

पट्टे तदीयेभयदेवसूरिरासीद्वितीयोहिगुणाद्वितीयः ।
जातो यतोयं जयतीह रुद्रपल्लीयगच्छः सुतरामतुच्छः ॥ ५ ॥

तत्पादांभोजभृंगोजनि जिनसमयांभोधिपाथोधिजन्मा
सूरींद्रो देवभद्रोनुपशमरमारामसेघोपमानः ।
तस्यांतेवासिमुख्यः कुमततमतिमश्चंद्रमार्त्तंडकल्पः
कल्पद्रुः कल्पितार्थप्रवितरणविधौ श्रीप्रभानंदसूरिः ॥ ६ ॥

ज्योतिस्तोमैरमानैः प्रतिहतजगतीवर्तितेजस्वितेजः-
स्फूर्ती तत्पट्टपूर्वाचलविमललसन्मौलिमौलीयमानौ ।
श्रीमान् श्रीचंद्रसूरिर्विमलशशिगुरुश्चाप्रमेयप्रभावौ
जातौ श्रीराजहंसाविव भविकजनव्यूहबोधैकदक्षौ ॥ ७ ॥

आकस्मीरमरीणचारुधिषणान् वादींद्रवृंदारकान्
माद्यद्वादविधौ विजित्य जगति प्राप्तप्रतिष्ठोदयः [याः] ।
सुरेंद्रा [सूरींद्रा] गुणशेखराः स्मयहराः शृंगारचंद्रक्षमा-
धीशाभ्यर्च [र्च्य] पदांबुजाः समभवंस्तत्पट्टशृंगारिणः ॥ ८ ॥

श्रीसंघतिलकाचार्यास्तत्पदांभोजरेणवः ।
सम्यक्त्वसप्ततेर्वृत्तिं विदधुस्तत्त्वकौमुदीम् ॥ ९ ॥

अस्मच्छिष्यवरस्य सोमतिलकाचार्यानुजस्याधुना
श्रीदेवेंद्रमुनीश्वरस्य वचसा सम्यक्त्वसत्सप्ततेः ।
श्रीमद्विक्रमवत्सरे द्विनयनांभोधिक्षपाकृत्प्रमे
श्रीसारस्वतपत्तने विरचिता दीपोत्सवे वृत्तिका ॥ १० ॥

सा सोमकलशवाचकवरानुजैरत्र विहितसाहाय्यैः ।
प्रथमादर्शे लिखितोपाध्यायैः श्रीयशःकलशैः ॥ ११ ॥

Digitized by Google

मेधामांद्यात्प्रमादाच्च यदवद्यमिहाजनि ।
तत्प्रसद्य महाविद्या (:) शोधयंतु विशारदाः ॥ १२ ॥
द्वादशात्मेव सद्वारैर्द्वादशात्मेव बोधकृत् ।
इयं सम्यक्त्वतत्वानां कौमुदी द्योत्यतां भुवि ॥ १३ ॥
प्रशस्तिश्लोकाः २९ । प्रत्यक्षरं निरूप्यास्याग्रंथमानं विनिश्चितम् ।
रुद्राद्रिमुनिसंख्याताः श्लोकाः सचतुरक्षराः ॥ १४ ॥
अनेन श्लोकेन सह ग्रंथमानं । ग्रंथाग्रं । ७७११ अक्षर ४ ॥ शुभं भवतु ॥

## काव्यप्रकाशस्य टीका—भीमसेनः

शब्दब्रह्म सनातनं न विदितं शास्त्रैः क्वचित्केनचित्
तद्देवी हि सरस्वती स्वयमभूत् काश्मीरदेशे पुमान् ।
श्रीमज्जैयटगेहिनीसुजठराज्जन्माप्य युग्मानुजः
श्रीमन्मम्मटसंज्ञया श्रिततनुं सारस्वतीं सूचयन् ॥ ४ ॥
मर्यादां किल पालयन् शिवपुरीं गत्वा प्रपठ्यादरा-
च्छास्त्रं सर्वजनोपकाररसिकः साहित्यसूत्रं व्यधात् ।
तद्वृत्तिं च विरच्य गूढमकरोत्काव्यप्रकाशं स्फुटं
वैदग्ध्यैकनिदानमर्थिषु चतुर्वर्ग्गप्रदं सेवनात् ॥ ५ ॥
कस्तस्य स्तुतिमाचरेत्कविरहो [वरो] को वा गुणान्वेदितुं
शक्तः स्यात्किल मम्मटस्य भुवने वाग्देवतारूपिणः ।
श्रीमान् कैयट औवटो ह्यवरजो य च्छात्रतामागतो
भाष्याब्धिं निगमं यथाक्रममनुव्याख्याय सिद्धिं गतः ॥ ६ ॥
संवद्ब्रहाश्वमुनिभूज्ञाते मासे मधौ सुदि ॥
त्रयोदश्यां सोमवारे समाप्तोयं सुखोदधिः ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारीणदीक्षितभीमसेनकृते काव्यप्रकाशविवरणे सुधासागरेर्थालंकारनिर्णयो नाम दशम उल्लासः ॥

Digitized by Google

## अश्वायुर्वेदः पत्र २७६।११।२८

॥ श्रीगणेशाय नमः

गणेशशालिहोत्ररेवंतेभ्यो नमः
प्रणिपत्य धवलतनुं मद्य[मान्ध]तिमिरहरं [हर] शशांकम् ॥
आयुर्वेदनिधिं महामुनिशालिहोत्रं च
ये शालिह्नोत्रसुश्रुतगर्गैररस्तु महर्षिभि[:] पुरागदिता[:] ॥
स्वेर्स्वे तुरंगशास्त्रे योगा[:] शांत्यै विकाराणाम् ॥
तेषां मध्यात् राजन् सारतरं हयहितार्य[र्थं]मुद्धृत्य ॥
रचितस्त्वयं[तस्त्वयं]समासेन संग्रहसंधिं [धिः सु] योगानाम् ॥
धर्मार्थकामसिद्धिं[द्धि]र्यथा तुरंगैर्भवेत्तथा पूर्वम् ॥
कथितैव महामुनिभिस्तथापि वक्ष्ये समुद्देशम् ॥
···इत्यश्वायुर्वेदे गणकृते सिद्धियोगसंग्रहे अश्वप्रशंसानामाध्यायः
इत्यश्वायुर्वेदे गणकृते सिद्धियोगसंग्रहे आवर्त्ताध्यायः
इत्यश्वायुर्वेदे गणकृते सिद्धियोगसंग्रहे सर्वांगपरीक्षाः
इत्याश्वायुर्वेदे गणकृते······मिश्रकी [क] नामाध्यायः
इ······महादोषाध्यायोनाम ॥ ० ॥·········
इ······तालुलक्षणम्······
इ······कुलाध्यायोनाम ॥······
इ······वर्णाध्यायः ॥······
इ······राजोपवाह्योध्यायोनाम ॥······
इ······प्ररेशनामाध्यायः······
इति पुंढराध्यायोनाम ॥
इतिलक्षणमष्टांगं शुभाशुभं रचितमेतदश्वानाम् ॥
शृण्वधुना मुनिकथितामिमां चिकित्सां समासेन ॥
इत्यश्वायुर्नेदे गणकृते सिद्धयोगसंग्रहे लक्षणमष्टांगं समाप्तम् ॥
इत्यश्वायुर्वेदे गणकृते सिद्धयोगसंग्रहे निर्देशाध्यायोनाम ॥······
इति······क्रियासूत्रनामाध्यायः········
इति शालाविधिः······
इति गुग्गुलकल्पः······
इति षट्गतिकोध्यायो नाम ॥······

Digitized by Google

इति लवणविधिः॥······
इति सस्यविधिः॥······
इति रसवीर्यविपाकनिश्चयोनामाध्यायः ॥······
इति रसवीर्यविधिः ॥······
इति सुराकल्पः ॥······
इति द्रव्यगुरुदोषनिश्चयः ॥······
इति खादनानि ॥······
इति दशमूलरसविधिः ॥······
इति महास्नेहः ॥······
इति का [कं] कोल्याद्यं तैलम् ॥······
इति स्नेहकल्पः समाप्तः ॥······
इति सुगंधिकटुकचूर्णम् ॥······
इति श्लेष्मघनविधिः ॥······
इति प्रतिपातकल्पः ॥······
शालिहोत्रे चित्रकाद्यवलेहः ॥······
नावनकल्पः [स्नानकल्पः] ······
इति धूमकल्पः ॥······
अभ्यंगविधिः ॥······
इति प्रलेपनकल्पः ॥······
उपनाहकल्पः ॥
इत्यग्निकर्माध्यायः ॥······
इति क्षारविधिः ॥······
इति शिरावेधविधिः ॥······
इति शस्त्रकथानामाध्यायः ॥······
इति स्वेदविधिः ॥······
इति चक्षु [क्षु] रोगकल्पः ॥······
कल्पसूत्रं समाप्तम् ॥······
एवं निदानानि समाप्तानि ॥
निदानस्थानं चतुर्थम्······
अर्बुदाचिकित्सा ॥ ······
शल्योद्धारचिकित्सा ॥······
प्रनष्टशल्याध्यायः ॥
तंत्रचिकित्सा ॥······

Digitized by Google

भमचिकित्सा ॥······

धन्वंतरिर्वैतरणिर्भारद्वाजोथकश्यपः ॥

एते विष [स्य] हंतार एते विद्याचि [विद्याश्चि] कित्सकाः ॥

···विषतंत्रचिकित्सा ॥······

ग्रहलक्षणाध्यायः ॥······

मुष्काध्यायः ॥······

वेधाध्यायः समाप्तः ॥

शोषचिकित्सा······

इत्यश्वायुर्वेदे गणकृते सिद्धियोगसंग्रहे **त्रमुनिश्वगणकृते** चिकित्सास्थानं पंचमं समाप्तम् ॥

अरोगाध्यायः ॥······

उपसर्गारिष्टाध्यायः ॥

उत्तरं सप्तमं स्थानं । एतत्संपरिकीर्त्तितम्

संग्रहाध्यायः ॥······

आयुर्ज्ञाननामाध्यायः ॥······

साराध्यायः ॥······

शेषलक्षणाध्यायः ॥······

सूतिकोपक्रमाध्यायः ॥······

अधिकारचिकित्सा ॥······

अतऊर्ध्वं रोगविज्ञानमुच्यते ॥······

वंध्योपक्रमः ॥······

यात्रालक्षणम् ॥······

शोभालक्षणाध्यायः ॥

धावनाध्यायः ॥······

स्वातिसंपातिको [शान्तिसम्पाठिको] नामाध्यायः ॥

इत्यश्वायुर्वेदे गणकृते सिद्धियोगसंग्रहे समाप्तमिदमुत्तरस्थानमिति ॥ समाप्तश्चायं दुर्लभसूनुगणकृते [तो] योगसंग्रहः । सुविस्तीर्णमु [न्मु] निप्रोक्ता ह [द्व] या (युर्वे) वेदससागरात् उद्धृतो योगरत्नानां गणएषस्ततोधुना ॥

······शालिहोत्रेण गर्गेण सुश्रुतेन च भाषितम् ॥······

तत्त्वजिद्वा [तत्त्वं यद्]जिशास्त्रस्य तत्सर्वमिह संस्थितम् ॥······

सप्तांगणकृतमश्वायुर्वेदशास्त्रमिति ॥······

यत्रापशब्दशतमानमसंगतीनां ॥ गणमयः समाप्तम् [प्तः]······

गणस्य पुस्तिका ॥ ॥ संवत् १७२७ वर्षे ॥······



Digitized by Google

## हस्त्यायुर्वेदशास्त्रम्

श्रीगणेशाय नमः

पालकाप्याय

प्रत्यूहव्यूहविच्छेदकारणं गणनायकः ।
जयति स्थिरसंपत्तिर्गजभक्तनिदर्शनः ॥ १ ॥
आमोदश्च प्रमोदश्च सुमुखो दुर्मुखस्तथा ।
अविघ्नो विघ्नकर्ता च हेरंबोगणनायकः ॥ २ ॥
लंबोदरो गजमुखो धूम्रकेतुर्गजाननः ।
सर्वकार्येषु हेरंबनामान्येतानि संस्मरेत् ॥ ३ ॥

अथ वनानुचरितमध्यायं व्याख्यास्यामः

अंगांगा [अंगाना] मधिपः श्रेष्ठः श्रीमानिंदुसमद्युतिः ।
वेदवेदांगतत्वज्ञः सर्वशास्त्रविशारदः ॥ ४ ॥
येनेयं पृथिवी सर्वा सशैलवनकानना ।
चतुःसागरपर्यंता भुक्ता ह्यमिततेजसा ॥ ५ ॥
स रोमपादोनृपतिश्चक्रवर्ती महायशाः ।
मेधावी धर्मवान् धीरो निर्जितारिः प्रतापवान् ॥ ६ ॥
अंगदेशेष्वभूच्छ्रीमान् रोमपादो महीपतिः ॥······
२४ अपश्यन्नागतांश्चंपां मुनयः शंसितव्रताः ॥······
दीर्घपरिकरं काप्यं नारदं सुरवंदितम् ॥······
गुणवत्या वचः श्रुत्वा मतंगो मुनिसत्तमः ॥······
भविष्यति हि ते पुत्रः सामगायनसंभवः ॥
दीर्घकालं तपोवीर्यै मौनमास्थाय यो व्रतम् ॥
चरिष्यति गजैः सार्द्धं शीर्णपर्णांबुभोजनः ॥
स्वयंभूः प्राग्ददौ यस्मै गजायुर्वेदमुत्तमम्
भविता त्रिषु लोकेषु तपोवीर्येण संयुतः ॥
पालकाप्यइति ख्यातो मुनिर्वारणबांधवः ॥······
पालनाद्गजयूथस्य काप्यगोत्रेण एवच ॥
पालकाप्यइति श्रीमान्नाम्ना ख्यातो भविष्यति ॥
एवं दिव्यवचः श्रुत्वा श्रीमतस्तस्य धीमतः ॥
पालकाप्यइति श्रीमान्नामधेयं चकार सः ॥······
तन्मां विद्धि महाराज प्रसूतं सामगायनात् ॥······
ग्राम्याणां व्याधयो ये च तन्ममाख्याहि पृच्छतः ॥

Digitized by Google

इत्युक्तो भूमिपालेन पालकाप्यस्ततोमुनिः ॥
हेतुमत्पुष्कलार्थं च वाक्यं राजानमब्रवीत् ॥
वने निबोध मे हेतुमारोग्ये वनचारिणाम् ॥······

इति पालकाप्ये गजायुर्वेदे महाप्रवचने महारोगस्थाने वनानुचरितो नामाध्यायः प्रथमः ॥

अंगोहि राजा चंपायां पालकाप्यं स्म पृच्छति ॥······
इत्यक्षिरोगा विधिवत्सनिदानचिकित्सिताः ॥
पृच्छते रोमपादाय विंशतिः परिकीर्त्तिताः ॥
महारोगमिति मया यत्ते स्थानं प्रकीर्त्तितम् ॥
तत्समाप्तमिहाध्याये प्रथमं शास्त्रनिश्चयात् ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने महारोगस्थाने अक्षिरोगाध्यायोष्टादशः ॥ समाप्तमिदं स्थानं प्रथमं महारोगाख्यम् अत्राध्याया अष्टादश अष्टोत्तरशतं च रोगाणां सनिदानानि चिकित्सितान्युक्तानि ॥ ॥

पालकाप्ये

स्थानानि चत्वारि ४ अध्यायाः १७० द्वितीयं क्षुद्ररोगस्थानं अध्यायाः ७० तृतीयं शल्यस्थानं अध्यायाः ३३ चतुर्थमुत्तरस्थानं अध्यायाः ४९ समग्रग्रंथसंख्या १२००० श्रीरस्तु शुभमस्तु ॥

## पत्र १०१ पं० ११ अ० ५१

॥ श्रीगणेशाय नमः

अथातः क्षुद्ररोगस्थानं द्वितीयमारभ्यते

अथ प [व] मथुरोगाध्यायं व्याख्यास्यामः

अंगोहि राजा चंपायां पालकाप्यं स्म पृच्छति ।
वारणानां वमथवः संभवंति कथं मुने ॥ १ ॥
गङ्गोद्भासितमौलिश्चन्द्रकलाललितशेखरः सततम् ।
अङ्गीकृतगलगरलो जयति जयन्तीपतिर्जगति ॥ २ ॥
यत्पादाम्बुरुहद्वन्द्वमिलिन्दीकृतमानसाः ।
भक्ता भवन्ति सिद्धीनां सदनं तामुमां भजे ॥ ३ ॥
उत्तुङ्गकुम्भयुगसान्द्रविलिप्तचारुसिन्दूरपूररुचिराय गजाननाय ।
दूरानताखिलसुपर्वकिरीटरत्ननीराजिताङ्घ्रियुगलाय सदा नतोस्मि ॥ ४ ॥
आधाय हृदि वाग्देवीचरणाम्बुजमादरात् ।
कुर्वे प्रकाशसंबद्धामुदाहरणचन्द्रिकाम् ॥ ५ ॥
चिरन्तनकृता व्याख्या[ः] समालोच्य यथामति ।
रचिता वैद्यनाथेन रामचन्द्रात्मजन्मना ॥ ६ ॥
कृतिरेषा कृपावद्भिः साधुभिर्ध्वनिपण्डितैः ।
गुणदोषविभागज्ञैर्निपुणं परिशोध्यताम् ॥ ७ ॥

स्वाधीनपतिका काचिदसकृदुपभुक्तेष्वपि वरोपकरणादिषूत्कण्ठोत्पत्त्या तेषामत्यन्तोपादेयतां सूचयन्ती सखीमाह ॥ यः कौमारेति ॥

च०

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञधर्मशास्त्रपारावारीणतत्सद्विट्ठलभट्टात्मजश्रीरामभट्टसूरिसूनुना वैद्यनाथेन रचितायां काव्यप्रकाशोदाहणविवृतावुदाहरणचन्द्रिकाव्याख्यायां दशम उल्लासः संपूर्णः

## THE COMMENTARY ON THE KÂVAYPRAKÂSA CALLED VISTÂRIKÂ.

**॥ काव्यप्रकाशटीका—विस्तारिका परमानन्दचक्रवर्त्ती ॥**

श्रीगणेशाय नमः

प्रियायाः पद्मायाः प्रणयकुपितायाः स्तुतिपरः
प्रसादं निर्मित्सुर्जलधिजनिवाणीपरिवृढः ।
परस्याः कौटिल्यात्कटुनि वचसि मोघति ततः
प्रदीप्तायां तस्यां जयति विनमद्वक्त्रकमलः ॥ १ ॥

कार्यो कदर्यैरिव नो भवद्भिर्नवेति हेला कृतिनः कृतौ नः ।
निवारितान्तःकलुषः किशोरतां दधत्कलाभृन्न पुनः पुरातनः ॥ २ ॥
न्यायाचार्यमनङ्गीकृतपरपक्षं बहुज्ञमीशानम् ।
गुरुमिह नत्वा काव्यप्रकाशविस्तारिकां तनुमः ॥ ३ ॥
प्रबलद्रोणजबाणैः क्षतविक्षतमुत्तरोदरगम् ।
रक्षतु परीक्षितं मे वचनं विबुधः सुदर्शनेनाशु ॥ ४ ॥
अविगीतशिष्टाचारपरंपरापरिप्राप्त..........

धावकनामा कविः स्वकृतिं रत्नावलीं नाम नाटिकां विक्रीय श्रीहर्षनाम्नो राज्ञः सकाशाद्बहुधनमवापेति पुरा वृत्तम् ॥ इति परमानन्दचक्रवर्तिकृतौ काव्यप्रकाशविस्तारिकायां प्रथम उल्लासः ॥ १ ॥

च०

जगदानन्दकन्दाय कृष्णाय परमात्मने ।
योगेश्वराय हरये तस्मै विश्वात्मने नमः ॥

इति काव्यप्रकाशविस्तारिका संपूर्णा ॥ शुभं भवतु ॥ श्रीरस्तु ॥ श्रीमद्वाराणसीनगरे । श्रीपार्श्वदेवानुभावतो वाचकवर्यैः श्री श्रीगुणरत्नगणिभिर्लिखिता ॥ शिष्यप्रशिष्यैर्वाच्यमाना चिरं भूयात् ॥ ग्रं० ८०००

## JAYADEVA'S CHANDRÂLOKA WITH THE COMMENTARY OF GÂGÂBHAṬṬA.

### चन्द्रालोकः—सटीकः—मू० जयदेवः टी० गागाभट्टः

मू० आ० ॥ उच्चैरस्यति मन्दतामरसतां जाग्रत्कलंकैरव..................
मू० च० पीयूषवर्षप्रभवचंद्रालोकं मनोहरम् ।
सुधानिधानमासाद्य श्रयध्वं विबुधा मुदम् ॥ ५ ॥
जयंति याज्ञिकश्रीमन्महादेवांगजन्मनः
सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः ॥ ६ ॥ महादेवः ॥ ०

टी० च० जयंतीति जयदेवस्यैव पीयूषवर्ष इति नामांतरे [रं] महादेव इति पूर्ववत्
॥ श्री ॥ गागाभट्टप्रकटिता चंद्रालोकसमाश्रया ।
मयूखे दशमे श्रांता वाजचंद्रवचःसुधा ॥
वाजबहादुरचंद्रस्याशीर्दानार्चनादिभिर्बहुधा ।
कुर्वन्त्वन्ये सेवां गागाभट्टस्य कृतिरियं सेवा ॥ ॥

## EXTRACTS FROM MSS. BELONGING TO PRIVATE LIBRARIES IN ALWAR AND JEYPORE.

---

### JYOTIRÎŚA'S PANCHASÂYAKA.

### पञ्चसायकः—ज्योतिरीशः

आ० ॥ श्रीगणेशाय नमः

रतिपरिमलसिंधुः कामिनीकेलिबंधु–
र्विहितभुवनमोदः सेव्यमानप्रमोदः ।
जयति मकरकेतुर्मोहनस्यैकहेतु-
र्विरचितबहुसेवः कामिभिः कामदेवः ॥ १ ॥
अस्ति प्रत्यहमर्थितापहरणकृत्यैकदीक्षागुरुः
श्रीकंठार्चनतत्परो भुवि चतुःषष्टेः कलानां निधिः ।
संगीतागमसत्प्रमेयरचनाचातुर्य्यचिंतामणिः
प्रख्यातः कविशेखरार्चितपदः श्रीज्योतिरीशः कृती ॥ २ ॥
दृष्ट्वा मन्मथतंत्रमीश्वरकृतं वात्स्यायनीयं मतं
गोणीपुत्रकमूलदेवभणितं बाभ्रव्यवाक्यामृतम् ।
श्रीनंदीश्वररंतिदेवरचितं क्षेमीन्द्रविद्यागमं
तेनाकल्पत पंचसायक इति प्रीतिप्रदः कामिनाम् ॥ ३ ॥

घ० इत्यष्टनायिकासमुद्देशः ।

यावच्चंद्रकलाकिरीटहृदये शैलात्मजा तिष्ठति
यावद्वक्षसि माधवस्य कमला सानंदमादीव्यति ।
यावत्कामकला विवर्त्तिचटुला क्षोणीतले वर्त्तते
ग्रंथः श्रीकविशेखरस्य कृतिनस्तावन्मुदे दीप्यते ॥ १ ॥
इति श्रीकविशेखरविरचिते पंचसायके पंचमसायकः समाप्तः ॥

### THE GOLÂDHYÂYA OF NITYÂNANDÂ'S SIDDHANTARÂJA.

### सिद्धान्तराजस्य गोलाध्यायः

अथ गोलाध्यायो व्याख्यायते ॥
तं वंदे गणनायकं सुरगणा यत्पादपद्मद्वयं
सेवंतेभिमतार्थसाधनविधौ विघ्नौघविध्वंसकृत् ।
यं सांख्याः पुरुषं प्रधानमपि वा शैवाः शिवं मेनिरे
नित्यं ब्रह्म चिदात्म सर्वमपरं मिथ्येति वेदांतिनः ॥ १ ॥

Digitized by Google

यत्किंचिद्गणितं ग्रहस्य गणको जानन्विना वासनां
पृष्टः सत्परेण गोलविदुषा प्रश्नप्रपंचोक्तिभिः ।
किं ब्रूते प्रति तं तदुत्तरमयं गोलागमाज्ञो यत-
स्तस्माद्गोलविचारचारुरचनां वक्ष्ये सतां प्रीतये ॥ २ ॥
रात्रौ सद्म विचित्रचित्ररचनं दीपं विना किं यथा
त्रैलोक्यं सकलार्थपूर्णमपि किं भास्वत्प्रकाशं विना ।
वैदग्ध्येन विना प्रगल्भतरुणी सौंदर्ययुक्तापि किं
तद्वद्गोलविवर्जितो गणिवि[णितवि]त्प्रश्नोत्तरे किं विभुः ॥ ३ ॥
पाटीकुट्टकबीजगोलनिपुणो वेदांतपारंगमः
काव्यालंकृतिशिल्पशास्त्रकुशलो यो न्यायशास्त्रादिवित् ।
सिद्धांतेत्र समस्तवस्तुसहिते तस्याधिकारो भवे-
च्चेदेवं न यथाकथंचिदभिधामात्रं प्रसिद्धिं नयेत् ॥ ४ ॥
कीदृक् भूगोलसंस्था कथय कथमहो चक्रसंज्ञो भगोलः
कीदृक् भूयः खगोलः स्थिर इह सततं कीदृशो दृष्टिगोलः ।
तत्तत्स्थं वस्तु कीदृक् सकलमपि यथा भूमिगोलेब्धिशैल-
द्वीपाद्यं तद्यथा वा विषुवदतिमुखं चक्रसंज्ञे भगोले ॥ ५ ॥
पूर्वापरं दक्षिणसौम्यवृत्तं भुजाभिधं कोणगमंडलं च ।
उन्मंडलाद्यं च खगोलसंस्थं तथैव दृग्गोलगतं यथा वा ॥ ६ ॥
अथ भूगोलभगोलखगोलदृग्गोलास्तत्तत्स्थवस्तूनि प्रोच्यंते ॥
च० । एवं पूर्वापरखगमार्गं मध्याभिधं सूत्रम् ।
पूर्वां वा परकाष्टां केंद्रं कृत्वा यदा भ्रतो वृत्तम् ॥ १० ॥
द्युज्यामंडलसदृशं ज्ञेयं पूर्वाभिधं तच्च
अथ खस्वस्तिक.................................. (अपूर्णम्)

---

## No. 2.

## ÛHAGÂṆADARPAṆAM BY PRÎTIKARA.

### ऊहगानस्य दर्प्पणम्—प्रीतिकरः.

आ॰ श्रीगणेशाय नमः सामवेदाय ॥

विरचयति सामदर्प्पणमूहग्रन्थस्य सामवित्प्रीत्यै ।
लक्षणमिव तमि॰ प्रीतिकरः पद्मसंभवं नत्वा ॥
प्रथमग्रंथस्यादौ संज्ञादीन्यभिहितानि यानि पुरा ।
तानि प्रथमं दृष्ट्वा पश्चाद्ग्रंथाशयं विद्यात् ॥
वेयगानसमानं यत्तदन्यत्र विभाव्यते ।
ऊहगाने विशेषः स वेयस्यापि च कथ्यते ॥
ऊहसामनि प्रस्तावाः ...सर्वसामजाः ।
कथ्यंतेत्र विचार्य्यैतद्बोधव्यं सामदर्पणम् ॥

उच्चाप्रभृतीनींद्रसतेषु पर्यतानि स्वासमानि सौभरनाम्मेध ऊर्ध्वसद्मन न जर्व उधाताइजातमंधसा महद्रूय इति विकृष्टवनिवौ विदित्युच्चैर्विश्वान्पर्य इति विवृत्ति ततीयायां तृतीयं यदक्षरं ना

च॰ मंद्रतम इति पदगीते ङे । ४७ सप्तमं पर्व त्रयोविंशतितमः ।

ऊहगानस्य सर्वेषां साम्नां संख्या प्रकीर्त्तिता ।
षड्विंशदधिक॰
एकर्च्चसामतुल्यानि स्वासु सामानि संख्यया । व॰
एतदधिकं शतमक॰ ।
खिलसामानि चोक्तानि चतुर्विंशति संख्यया ।
अष्टपंचाशदुक्तानि द्विस्तोत्रीयखिलानि च ।
अयायवस्वदेवयस्त्वचामित्थं च सस्पते ।
ऋग्द्वयं कथितस्त्वात्रंस्तृतीयैकाखिला तथा ॥ छ ॥

विरचितमिति सकलं तृतीयगानस्य सामदर्प्पणमित्यस्य लक्षणं तत्संपूर्णम् जातं तुरीयगानस्य समाप्तमूहगानस्य सामदर्प्पणमिति ॥

## No. 3.

## ÛHYAGÂNADARPAṆAM BY PRÎTIKARA.

### ऊह्यगानदर्पणम्—प्रीतिकरः

आ॰ श्रीगणेशाय नमः ।

कमलदलसदृशवर्णं चतुर्मुखं वेदसंमितं नत्वा ।
रचयति तुरीयगाने प्रीतिकरः सामदर्प्पणं शुद्धः ॥

Digitized by Google

कथितमारण्यगेये यत्सममूह्येपि तन्न कथनीयम् ।
ऊहवदन्यत्सर्वं विरच्यते विस्तरेणात्र ॥
प्रथमग्रंथस्यादौ संज्ञादीन्यभिहितानि यानि पुरा ।
तानि प्रथमे दृष्ट्वा पश्चाद्ग्रंथाशयं विद्यात् ॥

उँ आ त्वाशूरनोनुमो वा रथंतराणि चत्वारि प्रथमं श्वाशुसंज्ञं प्रस्तावाद्यमक्षरं ष द्वेते सर्वत्र प्रथमायां उद्गीथाद्यं तिष्ठपदांते ग्रहणं दीर्घं तु सर्वत्र अत्र सस्युषः उँ वा प्रत्यये विसर्गो स्वा त्वग्रहणं च सर्वत्र । असंभवमग्रे कथनीयं नत्वा वां इति रंगः दिव्य इति विकृष्टः ज प्रत्यये नकारो नादः उत्तरयोर्ऋचोश्चतुर्थपदादौ न वर्द्धते जनिष्यते अश्वे ते तृतीयायां नीचः अभिय इति मिशब्द आत्वं तीभुव-प्रकृतिः विनी इति संध्यागीतः तृच इत्याभावः पितर इति नीचः गर्भमिति रेफ-लोपः अन्यस्तो भो ते स्त ८

घ० आउभावः प्रत्यक् मो नो हा एते नीचे कर्त्तमिति विकृष्टं तादिंद्रास्तथा षा एते उच्चे पर्योगिरा एता नीचे वुके नानी एतानि नीचः कथ्य ऊह्यगानस्य सामदर्प्पणं संपूर्णमिदमिति.

अस्याग्रे कथयिष्यामि वेयदर्प्पणसंज्ञकं ।
उक्तमूहविधानेन शिष्याणां बुद्धिवर्द्धनम् ॥

## No. 5.

## THE CHHANDOVICHAYA.

## छंदोविचयः

आ० श्रीगणेशाय नमः सामवेदाय ॥

अथातः छंदसां विचयं व्याख्यास्यामो गायत्र्युष्णिगनुष्टुब्बृहती-पंक्तिस्त्रिष्टुब्जगतीति समार्षाणि

घ० ब्राह्मणात्तांडिनश्चैव पिंगलाच्च महात्मनः ।
निदानादुक्थशास्त्राच्च छंदसां ज्ञानमुद्धृतम् ॥
यस्माच्च छादिता देवाश्छंदोभिर्मृत्युभीरवः ।
छंदसां तेन छंदस्त्वं ख्यायते वेदवेदिभिः ॥
यथा छंदोभिराछन्नान्देवान्मत्स्यानिवोदके ।
न ह्यपश्यन्पुरा मृत्युरमृतत्वं ततो गताः ॥
छंदोविदेव विप्रस्तु धर्मतस्तद्गुणाश्रितः ।
छंदसामेति सालोक्यममृतत्वं च गच्छतीत्याह भगवान्गार्ग्यो
गार्ग्यः ॥ ८ ॥ ४ ॥ इत्युपनिदानं समाप्तम् ॥
इति छंदः समाप्तम् ॥

०

Digitized by Google

## No. 10.

## THE MANTRÂRTHADÎPIKÂ BY ŚATRUGHNA.

### मन्त्रार्थदीपिका—शत्रुघ्नः

आ० श्रीगणेशाय नमः

अलकं मिलितं कपोलमूले तिलकं चंदनबिंदुना दधानः ॥

.............................................

राजा श्रीरामचंद्रः क्षितिपतितिलकः क्षोणिचक्रैकभूषा
तस्मादासीजु[श्च] दोषाकर इव जलधेः शोभमानः कलाभिः ।
येन क्षोणीधरीयक्षितिपतिनगरे स्थापिता धर्ममार्गा
विद्याः किंचानवद्या द्विजवरनिवहाः शिक्षिता रक्षिताश्च ॥ ४ ॥
तेन श्रीधर्मचंद्रः समजनि धरणीपालमूर्द्धन्यरत्नं
यन्नादारामि[धि]तश्री यज्ञी[पति]पदकमलध्यानधाराधुरीयः ।
यस्मिन्ग[न्ता]यछम[मा]ने रणशिरसि धनुर्दंडमुद्दंडवीर्ये
प्रत्यर्थ[र्थि]क्षोणिपालाः क्षणमपि समरे नासितुं साक्षि[संक्ष]मंते ॥

आदेशादयराज्ञि[स्य राज्ञ]स्तस्य श्रीधर्मचंद्रस्य ।
मन्त्रार्थदीपिकेयं क्रियते शत्रुघ्नशर्मणा सम्यक् ॥
उअटे मंत्रव्याख्या गुणविष्णौ ब्राह्मणस्य सर्वस्वे ।
वेदविलासिन्यामपि कौशलमीक्ष्यं तथापि मे सद्भिः ॥ ७ ॥
पूर्वग्रंथेषु (या) व्याख्या लिख्यतेत्रापि सा मया ।
किंतु तेषुन्नहंपन्तदशाति[तेष्वप्यनुक्तं यत्तदप्याति]विशद्यते ॥ ८ ॥
स्नानमंत्रा तं[स्त]था संध्यामंत्रा देवार्चने तथा ।
श्राद्धमंत्रास्ततः पश्चात् षडंगशतरुद्रयमृ[द्रीयम्] ॥ ९ ॥
वैवाहिकादयो मंत्रा व्याख्यास्यंते क्रमादिह ।
उपोद्घातप्रसंगाभ्यां केचिदन्येपि कुत्रचित् ॥ १० ॥

च० श्राद्धे व्याख्यातं
इति श्रीशत्रुघ्नविरचितायां मंत्रार्थदीपिकायां श्राद्धपरिच्छेदः ॥

## No. 11.

## THE MÂDHYANDINÂRANYAKAVYÂKHYÂ.

### माध्यन्दिनारण्यकव्याख्या.

आ० श्रीगणेशाय नमः

द्वयाहप्राजापत्य इत्येवमाद्या षडध्यायी माध्यंदिनीयब्राह्मणोपनिषत्तस्या इयमल्पग्रंथा वृत्तिरारभ्यते उपनिषच्छब्देन मुख्यया वृत्त्या ब्रह्मविद्यैव वाच्या...

च० वंश इव वंशो यथा वो गु(रो) वेशः पर्वणः पर्वणो भिद्यते तद्वदग्रात्प्रभृत्यामूलप्राप्तेरयं वंशोध्यायइं(इ)स्याचार्यपरंपराक्रमो वंश इत्युच्यते तत्र प्रथमांतः शिष्यः पंचम्यंत आचार्यो [र्यो] बोद्धव्यः २० आग्निवेश्यः सैतवादाचार्यादधीतवान् २१ आत्रेयो मांटिरधीतवान् परमेष्ठी विराट्ब्रह्मणो हिरण्यगर्भादधीतवान् हिरण्यगर्भः स्वयं प्रतिभात[ति]वेद इति तत् आचार्यपरंपरा नास्ति यत्पुनर्ब्रह्म वेदाख्यं तत्स्वयंभु(वि) नित्यं तस्यै [तस्मै] ब्रह्मणे स्वयंभुवे वेदरूपेणावस्थिताय नमो वाङ्मन [:] कायकृतः प्रकटीभावो भवत्वित्यर्थः २२.

इति माध्यंदिनारण्यकव्याख्यायां द्वितीयप्रपाठकस्य पंचमं ब्राह्मणं द्वितीयोध्यायः ॥ २ ॥

## No. 17.

## VÊYAGÂNADARPAṆAM BY PRÎTIKARA.

## वेयगानदर्पणम्—प्रीतिकरः.

आ० श्रीगणेशाय नमः

ॐ मायि यर्कः प्रथमतृतीयश्चा वीशब्द इत्योत्वं वीशब्दतशब्दयोः बर्हित्योष्टयं रेफलोपश्च प्रथमतृतीये च याशब्द चतुष्टयं कृष्यते ओ १ अग्नआयाहिवी ॥ बर्हिष्टयं । हिषीत्यात्वं मध्ये विकल्पो । त् २

च० एषस्य वावासुताः भिः शब्दस्तर्जन्यादि त्त इति मध्यायां नु वा स्तोभः संलग्नः । को ७४ सप्तदशः प्रपाठकः सामदर्प्पणं ससाप्तम् ॥

## No. 18.

## THE SÂNKHÂYANAŚÂKHÂBṚIHATÎSAHASRAM.

## सांखायनशाखायां वृहतीसहस्रम्.

आ० श्रीग०

अध्वर्योशां३ सावो३ इत्युच्चैराहूय यथास्य वाक् सर्वा अन्या वाचोतिवदेत् उच्चैराहूय त्रिरूपांशुर्हिंकृत्य उपांशु तूर्ष्णीं शंसं तस्यातस्तस्मात् परं यद्वक्तव्यं तदुच्यते । अथ निष्केवल्यं वृहतीसहस्रं शंसति उपांशुत्रिर्हिंकृत्य ।

च० त्रिराहूयते स्तोत्रयेनिविदे परिधानीयाये वृहतिसहस्रं निष्केवल्यम् इति सांखायनशाखायां वृ.

Digitized by Google

## No. 22.

## THE JÂLANDHARAPÎṬHAMÂHÂTMYAM.

### जालन्धरपीठमाहात्म्यम्.

आ० ॐ स्वस्ति श्रीगणेशाय नमः

ॐ । अलिकुलसेवितगंडो दिवि बहुगुणवंदितचरणसरोजः । .........

श्रीनिवासगुरोरंघ्रियुगलं मुक्तिमंदिरम् ।

नत्वा त्वघविनाशाय वच्मि किंचिद्यथाश्रुतम् ॥ १ ॥..............

विपाशापरपारं तु समारभ्य विशिष्टकम् ।

हिमाचलावधिः स्वस्तिक्षेत्रं तत्सर्वसंमतम् ॥

जालंधराभिधं सर्वं सिद्धीनां निलयं सदा ........................

अ० इति धर्त्तयितुं भूमौ जायते विफलो द्रुमः ॥ २४९२ ॥ ( श्लोकमानं )

इति श्रीजालंधरमाहात्म्यं सपूर्णम् ॥

## No. 44.

## THE GṚIHASTHARATNÂKARA.

### गृहस्थरत्नाकरः नु०.

### तरंगनामानि.

इति गृहस्थरत्नाकरे प्रतिग्रहविधिस्तरंगः क्षत्रियवैश्यकर्मधर्मतरंगः शूद्रधर्मतरंगः स्नातकव्रततरंगः यमनियमतरंगः स्तेयापवादतरंगः शौचतरंगः ब्रह्मचर्यतरंगः नियमतरंगः कुलनाशनतरंगः वासतरंगः वाच्यावाच्यतरंगः प्रवेशानतरंगः अनाक्रमणीयानधिष्ठेयादितरंगः अनवलोकनीयतरंगः शूद्राप्रदेयतरंगः क्रोधादिवर्जनतरंगः परदारादिवर्जनतरंगः संकरतरंगः त्याज्यात्याज्यतरंगः

अपुत्रिणः निंदाकृता पुत्रवतश्च स्तुतिः कृता इत्यादीनि चान्यानि पुत्रदेशे विवादरत्नाकरेस्माभिर्वर्णितानि तानि तत्रैवानुसंधेयानि

इति गृहस्थरत्नाकरे ऋणापाकरणतरंगः ॥

## No. 46.

## THE JÂTIVIVEKA BY GOPÎNÂTHAKAVI.

### जातिविवेकः गोपीनाथः.

आ० ॥ श्रीरामो जयति श्री गणेशाय नमः ॥

अथ विश्वंभरवास्तु शास्त्रात्

सप्तलोकाधिपो देवो ब्रह्मा वै चतुराननः ।

आद्ये कृतयुगस्यादौ निविष्टः कमलासने ॥

Digitized by Google

सृष्ट्वा प्रजापतिं पूर्वं देवान् दैत्यांश्च राक्षसान् ।
स्वमुखाद्ब्राह्मणान् जज्ञे क्षत्रियान् बाहुतस्तथा ॥
ऊरुद्वयात्ततो जज्ञे वैश्यान् शूद्रांश्च पादतः ।
आह्वयद्विश्वकर्माणं ब्रह्मा कमलसंभवः ॥
आगत्य विश्वकर्मा वै नमश्चक्रे स्वयंभुवे ।
अहमस्म्यागतो ब्रह्मन् ब्रूहि किं करवाणि ते ॥

ब्रह्मोवाच ।

भौमाः स्वर्ग्या यथा पूर्वमासन् कुरु तथैव तान् ।

..................................................

इत्यादिष्टो विश्वकर्मा ब्रह्मणा शिल्पिनां वरः ।
नत्वा विधिं तथा चक्रे मर्त्यलोकमुपेत्य सः ।

..................................................

सद्योजातवपुः पुराणपुरुषो रुद्रोपि शांतात्मवा-
नीशानोपि च पश्चिमागमपरः शुभ्रोपि कृष्णांतरः ।
वामो दक्षिणतां गतो मखपतिर्दक्षाध्वरध्वंसकृ-
द्देत्ता स्वं चरितं स्वमेव सकलं यस्तं नमामीश्वरम् ॥
यां विना सच्चिदानंदो न वेद्यो विद्ययेश्वरः ।
इच्छाज्ञानक्रियारूपां वंदे तच्छक्तिमंबिकाम् ॥
ब्रह्मणोयं मुखं चैव नेतिराह प्रपंचतः ।
भजे तमाद्यं पुरुषं वर्णानामादिकारणम् ॥
नारायणस्ततो भानुरीश्वरः सामसंज्ञकः ।
भट्टाभिधानं चापुस्ते प्रत्यंडपुरवासिनः ॥
चत्वारस्तनया आसन् सामराजस्य विश्रुताः ।
विश्वनाथो महादेवो भानुर्लक्ष्मीधरस्ततः ॥
संख्यावानप्यसंख्योभूद्विश्वनाथो गुणव्रजैः ।
निवासः श्रीसरस्वत्यो रूपौदार्यकलाश्रयः ॥
वासिष्टान्वयसंभवः स च पुनः श्रीविश्वनाथः कलौ
व्यासत्वं स्वयमन्वगाच्छ्रुतिपरः किं तत्र चित्रं महत् ।
तस्माच्छार्ङ्गधरः कलासु कुशलः प्राप[पो]द्भवं तद्भवो
गोपीनाथकविः करोति सगुणं जातौ विवेकं स्फुटम् ॥
५० उत्तमैः सह संसर्गं कुर्यान्नैवाधमैः सह ।
उत्तमैरुत्तमाल्लोकानधमैरधमान् व्रजेत् ॥ इत्यादि ॥
इति जातिविवेकः संपूर्णः ॥

Digitized by Google

## No. 49.

## THE DHARMAPRAVṚITTI BY NARAYAṆA.

### धर्मप्रवृत्तिः—नारायणः.

आ० श्रीगणेशाय नमः ॥ अविघ्नमस्तु ॥

ॐ न[मस्कृत्य] नमस्कृत्य कामदां च सरस्वतीम् ।
गणनाथं गुरूंश्चापि धर्मसंरक्षणाय वै ॥ १ ॥
धर्मप्रवृत्तिः क्रियते कलौ नारायणेन तु ।
विदुषां कर्मनिष्ठानां - - - - - -
आलोक्य धर्मशास्त्राणि मन्वादिभिः कृतानि वै ।
आश्वलायनसूत्रं च वृत्तिं नारायणीं तथा ॥ ३ ॥
सारमेव समुद्धृत्य स्मृतीनां वचनान्यथ ।
सिद्धांतानि समूलानि समादायाथ चैव हि ॥ ४ ॥
वचनानि सतां चैव संमतानि मनीषिणाम् ।
ग्रंथेस्मिंस्तानि लिख्यंते धर्मप्रवृत्तिसंज्ञके ॥ ५ ॥
शौचादिकाः प्रवक्ष्यामि क्रियाश्चानुक्रमेण तु ।
तिथीनामपि सर्वासां निर्णयानप्यसंशयान् ॥ ६ ॥
॥ योगीश्वरः ॥
यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत ।
धर्मसंरक्षणार्थाय तस्मिन्देशे वसेद्द्विजः ॥ ७ ॥............
(अपूर्णम्)

## No. 61.

## THE VIVÂDÂRṆAVABHANGA.

### विवादार्णवभंगः—बालेश्वराद्यः.

आ० श्रीगणेशाय नमः ॥

विश्वेषां शरणं नवांबुदरुचिः सद्भक्तचिंतामणि-
र्यः प्रत्यूहतमोविनाशमिहिरः कीनाशभीनाशनः ।
संसारैकमहार्ण्णवे निपततां निस्तारवीजं नृणां
गोविंदः कृपया सुरासुरगणैर्वंद्यश्चिरं पातु वः ॥ १ ॥
चंडेशधारेश्वरविश्वरूपा मिताक्षराकारहलायुधौ च ।
श्रीकृष्णवाचस्पतिधर्मरत्नकृतस्तथा श्रीकरशूलपाणी ॥ २ ॥

Digitized by Google

गोविंदलक्ष्मीधरतत्वकारा आचार्यचूडामणिनाचभट्टः ।
वाक्यानि चैषां सुविमृश्य कुर्मो ग्रंथं विवादार्णवभञ्जनाख्यम् ॥
इह वाच्यानि वर्णादेः सृष्टिर्वर्णस्य वृत्तयः ।
राजप्रशंसा तच्छत्रमंत्रिदूतादिलक्षणम् ॥
राजधर्म ऋणादानं वृद्ध्यादिविधिलग्नकाः ।
ऋणदानोद्ग्रहणयोर्विधिर्दायनिरूपणम् ॥
मृतादीनां तत्र पुंसामधिकारिविवेचनम् ।
स्त्रीधनस्य स्वरूपं तदधिकारिनिरूपणम् ॥
भागानर्हश्च दायानामविभाज्यविभाज्यता ।
पितृकृतविभागश्च भ्रातृभागविधिस्तथा ॥
संसृष्टानां विभागश्च विदेशागतवंदनम् ।
निह्नुतस्य विभागश्च भागसंदेहनिर्णयः ॥
भुक्तिर्व्यवहारलक्ष्म्यादिभाषापादस्ततः परम् ।
उत्तरपादक्रियापादौ ततो निर्णयपादकः ॥
निक्षेपविधिरस्वामिविक्रये च विधिस्तथा ।
विधिस्ततश्च संभूय समुत्थानेत्र भण्यते ॥
कर्षकादेर्भागविधिस्तथा दत्ताप्रदानिकम् ।
अत्रादेयदेयदत्तादत्तानां विधिरुच्यते ॥
भृतकानां विधिस्तत्र दास्यमोक्षाधिकारिणौ ।
वेतनस्वामिपालस्त्रीपण्यानां विधिरुच्यते ॥
विक्रीयासंप्रदानं च क्रीतानुशय उच्यते ।
सीमाविवादे च विधिः कृष्टाकृष्टे विधिस्तथा ॥
सस्यरक्षाविधिस्तत्र सस्यघातदमस्तथा ।
सस्यघातेप्यदंड्याश्च वाक्पारुष्यविधिस्तथा ॥
विधिस्तु दंडपारुष्ये तथा स्तेयनिरूपणम् ।
प्रकाशतस्करदमोप्रकाशचौर्यदंडनम् ॥
चौर्यान्वेषणचौर्यातिदेशापवादनिर्णयः ।
साहसे तु दंडभेदो घातकान्वेषणं ततः ॥
स्त्रीसंग्रहणतद्दंडौ परदारगमे दमः ।
स्त्रीपुंधर्मे निर्णयश्च प्रकीर्णकमतः परम् ॥
..................................

व० उदितो विस्तरेणायं मिथ्याविवदमानयोः ।
अष्टादशसु मार्गेषु व्यवहारविनिर्णयः ॥

Digitized by Google

एवं कार्याणि सर्वाणि सर्वान्[कुर्वन्] सम्यग्महीपतिः ।
देशेनु[दशान]लब्धानि[नी]प्सेत लब्धांश्च परिपालयेत् ॥
बालेश्वरकृपाराम*गोपालकृष्णजीवनाख्यैः ।
वीरेश्वरकृष्णचंद्रश्रीगौरीकांताभिधानैः सद्भिः ॥
कालीशंकरस्यामसुंदरकृष्णकेशवसंगैः ।
सीतारामसंगैश्च कृतो ग्रंथः स्फुरतु सभायाम् ॥
इत्यनेकविषयवासिविद्वद्वृंदोपवर्णितः ।
विवादार्णवभंगाख्यो ग्रंथः संपूर्णतां गतः ॥

No. 71.

## ATANDRACHANDRIKAM BY JAGANNÂTHA.

## अतन्द्रचन्द्रिकप्रकरणम् जगन्नाथः.

आ० श्रीगणेशायं नमः श्री०

या विद्याः कपिलाक्षपादभरतद्वैपायनादीन् पुरा
संश्रित्य न्यवसन् जहुर्न विरहप्रारब्धदुःखं मिथः ।
ता निर्द्धूतवियोगदुःखमवसन् यस्मिन् सुभद्रोदये
तं विद्यानिधिमादरेण कलये भद्राय पीतांबरम् ॥ १ ॥

आदिष्टोस्मि महाराजेन प्रत्यर्थिसार्थसार्थकीकृतपार्थविक्रमेण विकटरिपुभटकरटिघटाकरतटमुक्तफलबीजभरिततुरगखुराकृष्टसमरभूमिक्षेत्रप[प्र]रूढयशःपादपछायाशिशिरीकृतसंसारिण सुरतकेलीकलहत्रुटद्द्विजवधूवक्षोजमंडनहारगलितमौक्तिकवीजसमुद्भूतकीर्त्तिलतालंबनपादपेन फतेसाहदेवेन यदेतान् तच्चरणनखधवलीकृतकिरीटकोटीनधी[धि]गंगातरं मच्चरणपरिचरणाय मिलितान् नरपतीनाभिनवेन सकलरसशबलेन प्रकरणेनानुरंजायितुमर्हसीति तत्सज्जीभवन्तु भवंतो भगवतो भरतस्य भारतीमनुसरंतः स्वीयस्वीयवार्णिकापरिग्रहेण

सूत्र०

अहो साहसोपन्यासः प्रियवयस्यस्य भावस्य सकलकलावतां महाराजफतेशाहसभासदामनुरंजनाय यत् प्रयतसे कथय किं रूपकमाश्रित्यानुरंजयिष्यसि सामाजिकान्

पारि० ।मारिष मावमंस्थाः आसीत्कश्चिद्विद्वद्वृंदवंद्यमानचरणो विद्यानिधिपदलांछनः पीतांबरो नाम मैथिलः ।

सूत्र० सकलजनविदित एव सः कैरामभद्रस्यात्मजः यस्य दुष्करां प्रतिज्ञामुदाहरंति ।

* MSS. बालेश्वरकृपारामसम The correction is from a copy in the Boondi Palace Library.

न सदाचरितादपैमि मार्गात् परजायां जननीसमामवैमि ।
गुणमात्रमुपैमि रामभद्रात् सुकृतागाधमहोदधेरुदेमीति

पारि० आश्रया इव लोकेशात् पुरुषार्था इवेश्वरात् ।
तस्मादजायंत सुताश्चत्वारो गुणवत्तराः ॥

तेषु विद्याभिः कलाभिर्वयसा च कनीयसो जगन्नाथस्य कवेः कृतिः ।

च० प्रकरणमवनीमंडले चाकसीतु ॥ ७ ॥
इति निष्क्रांताः सर्वे चंद्रिकाप्रत्यानयनं नाम सप्तमोंकः ॥
समाप्तं चेदमतंद्रचंद्रिकं नाम प्रकरणम् ॥

No. 72.

## KÂDAMBARÎPRADEŚAVIVṚITTI BY SUKHÂKARA.

## कादम्बरीप्रदेशविवृत्तिः—सुखाकरः.

···जातिरलंकारः मुख्यविशेषश्च स्रजो मालः[लाः] कुंमलैः कलिकादिभिः [बु]धगुप्ताः कुमारगुप्तादयः पुरोडाशपवित्रिताध[ध्व]रत्वेन सततप्रवर्त्तितयज्ञतामाह । सोमस्तृणविशेषः कषायितं भावितं उदरमभ्यंतरं मंथरं गंभीरं

च० सर्वमेव त्वन्मयमस्या इत्यर्थः
कादंबरीप्रवे[दे]शविवृत्तभिस्स[त्तिः स]माप्ता । कृतिः सुखाकरस्य ॥

No. 74.

## A TIPPANÎ ON KÂDÂMBARÎ BY MAHÂDEVA.

## कादम्बरीटिप्पणी—महादेवः ॥ अपूर्णा.

आ० श्रीगणपतये नमः

गणपतिपदाब्जकोशे निःसंदेहं ममात्रसच्चित्तम् ।
मकरंदलोभवित्तं धत्तां रोलंबतां नित्यम् ॥ १ ॥
सर्वस्वीकृतशैलराजतनयाश्लेषं सुवेषं महत्-
कोषं संस्मृतितो निरस्तजनतादोषं ध्वजेधावृषम् ।
निःशेषं निकषात्मजास्तपरुषं शेषीकृतश्रीमहा-
शेषं भस्मितमुग्धमारवपुषं वंदे शिवं सत्तृषम् ॥
निजपादसरोजपांसुसंगात् सहसा येन शिलाबलाप्यकारि ।
असकृन्मुनिरप्यलं सकामः शरणं मेस्तु दयानिधिः स रामः ॥
सुकृतीकृतयामुनीयकूलं चपलारुग्रुचिरं दधद्दुकूलम् ।
जनतावनशर्मधर्ममूलं जलदाभं वपुरस्तु मेनुकूलम् ॥
आलोच्याखिलकोषजातममलं तच्छब्दशास्त्रांतरं
नानाप्राक्तनकाव्यरीतिरचनाचातुर्यसारानपि ।



Digitized by Google

श्रीमद्बाणकविप्रणीतकवितागूढार्थविद्योतिनीं
सोत्साहं मतिवैभवाद्वितनुते विद्वन्मतां टिप्पणीम् ॥
महादेवाभिधः श्रीमत्पट्टवर्द्धनवंशजः ।
मुद्गलोदररत्नश्रीर्मुक्तामणिरिवापरः ॥ युग्मम् ॥

च० गलिताशंकः निःशंक इत्यर्थः
तथाहीति कठोरः जरठः (अपूर्णम्)

No. 83.

## THE MUNDITAPRAHASANAM BY ŚIVAJYOTIRVID.

## मुंडितप्रहसनम्—शिवज्योतिर्विद्.

आ० ॥ श्रीगणेशाय नमः ॥

कठिनकुचयुगं ते चंचलाक्षिद्वयं ते कुटिलकचचयस्ते मंदयानं त्वदीयम् ।
अतिकृशतममध्यस्ते मिथः केलितल्पे प्रलपनमिति रोषात् पातु गौरीशयोस्ते ॥१॥
नांद्यंते सूत्रधारः ॥...............................

सूत्र. भद्र सम्यग् दृष्टवानसि यत्सत्यं शिवज्योतिर्वित्कृतं मुंडितप्रहसनं ...

च० नंदंतु सर्वाः प्रजाः २४ श्यालादयः तह भोवु इति निष्क्रांताः सर्वे ।
मुंडितप्रहसने शिवज्योतिर्विद्कृते तृतीयोंकः ॥

No. 87.

## THE LAṬAKAMELAKA BY KAVIRÂJA-ŚANKHA-DHARA.

## लटकमेलकप्रहसनम्.—शंखधरः.

आ० श्रीगणेशाय नमः

गौरीचुंबनचंचलं चलचलच्चंद्रप्रभामंडलं
व्यावल्गत्फणिकुंडलं रतिरसप्रस्विन्नगंडस्थलम् ।
.....................................

नांद्यंते सूत्रधारः अलमतिविस्तरेण यतः
गोविंददेवः प्रथितः पृथिव्यां श्रीमन्महामंडलिकाधिराजः ।
कविप्रियो नाटकनर्त्तनार्थमादेष[श]यन्मां रणरंगमल्लः ॥ ३ ॥

तदस्य वसंतसमयप्रारंभसमुचितेन कविराजश्रीशंखधरविरचितेन लटकमेलकनाम्ना प्रहसनेनास्मान्विनोदयेति ॥

च० आस्तां विद्वत्प्रकांडश्रवणपटुचमत्कारि काव्यं नवीनं ।
अस्तु व्यामोहशांतिः सृजतु हृदि मुदं निश्चलं चंद्रचूडः ॥ ७४ ॥
इति निष्क्रांताः सर्वे ॥

इति श्रीकविराजशंखधरविरचितं लटकमेलकनाटकं समाप्तम् ॥

Digitized by Google

No. 99.

## KOŚAKALPATARU BY VIŚVANÂTHA.

## कोशकल्पतरुः--विश्वनाथः.

आ० ॥ श्रीमन्मंगलमूर्तिर्जयति ॥

श्रीपीतांबरमालंबे निरालंबावलंबदम् ।
अजिष्णुमतयः शब्दब्रह्मरूपं वदंति यम् ॥
श्रीनारायणनामानमानम्य पितरं चिरम् ।
कोषकल्पतरुं कुर्मः शर्मणे कविसंसदः ॥
रूपभेदात्साहचर्यात् समासाद्विधितस्तथा ।
समुल्लसल्लिंगभेदैः श्लेषादौ संशयच्छिदे ॥
स्वरव्यंजनवैचित्र्यात् पृथक्पृथगुदाहृतैः ।
नामभिर्विलसद्वर्गशाखासर्गनिरर्गलः ॥
अशेषकोषकृद्ग्रंथशिष्टनामफलोच्चितः ।
कोषकल्पतरुस्तोषं कवीनामेष धास्यति ॥
शास्त्रानुशिष्टकविभाषितदृष्टमृष्टनानानवीनतरनामफलानि चिन्वन् ।
श्रीविश्वनाथकृतकोषसुकल्पवृक्षान्न क्षोभमेति सुकविर्नवभव्यकाव्ये ॥
रूढयौगिकमिश्रत्वैस्त्रिधा नामानि निर्दिशेत् ।
अव्युत्पन्नानि रूढानि यथा स्याद्रोमतालिका ॥
संबंधगुणकर्माद्यैर्व्युत्पत्त्या यौगिकानि च ।
परिवृत्तिसहान्येतान्युर्वीशो भूपतिर्यथा ॥
न सहंते परावृत्तिं मिश्राणि तदुदाहृतिः ।
प्राक्पदं वडवाग्न्यादौ वार्निध्यादौ तथोत्तरम् ।
परिवृत्तिं न सहते गीर्वाणादौ पदद्वयम् ।
तस्मात् कविपथं ज्ञात्वा नामानि परिकल्पयेत् ॥

च० आम्नातमत्र नाम्नां कविमुखधाम्नां हि दिग्मात्रम् ।
यत्पदपद्मविभूत्या तं गुरुमत्यादराद्वंदे ॥ ६६ ॥ इत्यूष्मांतवर्गः ॥
विद्यागर्भविदर्भदेशतिलके देवालये पत्तने
श्रोत्रार्हत्यसमर्हणीयचरणक्षोणीसुरग्रामणीः ।
आत्रेयः सुपवित्रचित्रचरितांतर्वाणिचूडामणिः
सद्विद्यानिरवद्यवैद्यकुलजो नारायणोभूद्बुधः ॥ ६७ ॥
वाग्वीथीभिरुपस्कृतावनितलो यः सोमपीथी चिरा-
दायुर्वेदमहोदधेस्तरिजुषां वायुः किलावामगः ।

Digitized by Google

धाम्ना यस्य मुदां गदांतपटुना नाम्ना पुराम्नायवि-
द्रवै सर्वजनीनमाशु जहितो दस्रौ सदस्रौ न किम् ॥ ६८ ॥
वैदर्भीभृतगद्यपद्यकवितामाद्यद्रसांभोनिधे-
रुद्यंतीं मुहुराशयत् मुखसुधां भूम्ना बुधान् यो भुवि ।
श्रीनारायणपंडितस्य तनयस्तस्य प्रशस्ताभिधः
संद्विद्यो भुवि विश्वनाथ उदभूत् सेवासनाथः पितुः ॥६९॥
संसारावर्त्तसारं सविन[ज]यमजयं भागुरिं शाश्वतं च
व्याडिं गौडं महेशं सरभसमरुणं मेदिनीं नंदिनं च ।
दुर्गं हैमं च वाचस्पतिममरमुणादिं च गोवर्द्धनीयं
रुद्रं चंद्रं च मालां मतिजलधिकृतं चारुहारावलीं च ॥ ७० ॥
शब्दार्णवं चोत्पलिनीं सुभूतिं हलायुधं विक्रमभूपतिं च ।
कोषानशेषानुदयद्विशेषां च्छेषास्यसारस्वतपूरपूतान् ॥ ७१ ॥
विभाव्य भूयः सुकविप्रयोगांस्तेभ्यः समुच्चीय च चारुशब्दान् ।
सत्कोषकल्पद्रुम एष भूमौ कृतः कृतिप्रीतिकृतेस्ति तेन ॥ ७२ ॥
कवीनां नवीनाभिधालालसानां सुभूरिप्रबंधेक्षणे चालसानाम् ।
असौ पूरयेत् भूतले भानुकामं मही वामुना स्वःसमास्तु प्रकामम् ॥ ७३ ॥
श्रीविश्वनाथरचिते कोषकल्पतराविह ।
कांतादिभिः सप्तवर्गैर्नानार्थस्कंध ईरितः ॥ २७४ ॥
इतिश्री विश्वनाथकृतः कोषकल्पतरुः समाप्तः

No. 100.

## JNÂNAVIMALA'S COMMENTARY ON MAHEŚVARA'S ŚABDABHEDAPRAKÂŚA.

**शब्दप्रभेदः सटीकः मू० महेश्वरः टी० ज्ञानविमलः.**

टी. आ. श्रीगणेशाय नमः ॥
श्रीमंतं भगवंतमन्वहमहं श्रीशांतिनाथं जिनं
नुत्वा भक्तिमतां मनीषितमहासत्कर्मशांतिप्रदम् ।
त्रैलोक्ये समवाप यः पटुतरां विख्यातिमंबाचिरा-
गर्भस्थेन च येन दुःखविगमश्चक्रे जनस्य क्रमात् ॥ १
सकललोकलसन्मतिदायिनीं भगवतीं प्रणिपत्य सरस्वतीम् ।
सुरनरेश्वरशंकरदेवताप्रभृतिभिर्नितरां चिरसंस्तुताम् ॥ २
श्रीमदभयदेवाव्हान् सूरीन् जिनदत्तसूरिराजांश्च ।
वंदित्वा शुभकर्तॄन् श्रीमज्जिनकुशलसूरींश्च ॥ ३

Digitized by Google

विश्वप्रकाशभागुरिविजयंतव्याडिशाश्वतादीनाम् ।
शास्त्राणि वीक्ष्य पथ्यापथ्याभिधसन्निघंटुं च ॥ ४
श्रीमन्महेश्वरसुधीविनिर्मिते शब्दशास्त्रमूढानाम् ।
शब्दप्रभेदशास्त्रे करोमि वृत्तिं प्रबोधाय ॥ ५ पंचभिः कुलकम् ॥
शास्त्राणां हुंडिकालेखो न कृतोस्माभिरत्र च ।
शास्त्रेषु शब्दशास्त्रज्ञैर्ग्रंथगौरवभीरुभिः ॥ ६

नन्वत्र ग्रंथारंभे श्रीमन्महेश्वरकविभिर्विशिष्टशिष्टेष्टसमयपरिपालनार्थं प्रत्यूहव्यूहव्यपोहार्थं चाभीष्टदेवतानमस्काररूपं विमलं मंगलं विदधे तत्र किं कारणमित्याशंकामपाकर्त्तुमुच्यते इह हि प्रेक्षापूर्वकारिणां महाकवीनां ग्रंथारंभे यथाभीष्टदेवतासंस्तवनमभ्युदयनिदानं तथैवोत्कृष्टप्रशब्दग्रहणं सकलमंगलनिदानमस्तीति स्वमनसि निधाय श्रीमन्महेश्वरकवयः प्रशब्दमादौ प्रायुंजत

उक्तं च ।

प्रशब्दश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कंठं भित्वा विनिर्यातौ तस्मान्मंगलवाचकाविति

यथा च

श्रीकात्यायनाचार्याः नित्ये शब्दार्थसंबंध इति वक्तव्ये सिद्धे शब्दार्थसंबंध इत्युक्तवंतः

यथा श्रीपाणिन्याचार्या अपि पाणिनीयव्याकरणादावादैच्वृद्धिरितिवक्तव्ये वृद्धिशब्दमादौ प्रयुज्य वृद्धिरादैजित्यभिहितवंतः

यथा कुमारा अपि वर्णसमाम्नायः सिद्ध इति वक्तव्ये कालापव्याकरणादौ सिद्धो वर्णसमाम्नाय इति प्रयुक्तवंतः

यथा इंद्रा इंद्रव्याकरणादौ रूढेरनुक्तानां सिद्धिरिति वक्तव्ये सिद्धिरनुक्तानां रूढेरिति रचितवंतः

यथा हेमचंद्राचार्या अपि सिद्धहेमचंद्रव्याकरणादौ स्याद्वादात्सिद्धिरित्यभिधेये सिद्धिः स्याद्वादादिति कथितवंतः

यथा श्रीमद्बोपदेवविद्वांसोपि मुग्धबोधव्याकरणादौ शब्दैः शमिति वक्तव्ये शं शब्दैरिति कृतवंतः

यथा च शाकटायनाचार्याः स्वोपज्ञशब्दानुशासनवृत्तावादौ श्रीवीरममृतं ज्योतिर्नत्वादिं सर्ववेद[ध]सामिति मंगलार्थं श्रीशब्दप्रयोगं संदृब्धवंतः

Digitized by Google

यथा श्रीअनुभूतिस्वरूपाचार्या अपि सारस्वतीं प्रक्रियां ऋजुं कुर्वाणाः प्रणम्य परमात्मानमिति मंगलार्थं प्रशब्दप्रयोगं धृतवंतस्तथा धीमंतः श्रीमहेश्वरकवयोपि शब्दप्रभेदनामग्रंथादौ शिष्टाचारमूलं प्रशब्दलक्षणं मंगलं इत्यवधार्य प्रशब्दप्रयोगं न्यस्तवंत इत्यवसेयम् तस्य चायमादिः

मू० आ० प्रबोधमाधातुमशाब्दिकानां ......................................

मू० च० कवेर्जायत एव वा ५

टी० च० पद्यत्रिकमिदं प्रकटार्थम्

इति श्रीमद्बृहत्खरतरगच्छे श्रीजिनराजसूरिशिष्यश्रीजयसागरमहोपाध्यायसंताने वाचनाचार्यधुर्यश्रीभानुमेरुगणिशिष्यश्रीज्ञानविमलमहोपाध्यायविरचिता शब्दभेदप्रकाशटीका समाप्ता ।।

No. 100—(*continued*).

## JNÂNAVIMALA'S GURUPAṬṬÂVALI.

## गुरुपट्टावली-ज्ञानविमलः.

श्रीमद्विक्रमतो ह्यशीतिसहितेब्दानां सहस्रे वरे<br>
निःक्रांते स बभूव सत्खरतराख्यः सद्गुणो भूतले ।<br>
दृप्यच्चैत्यनिवासिदर्पदलनाच्छ्रीदुर्लभक्ष्माभृदा-<br>
स्थाने सूरिजिनेश्वरेण गुरुणा विख्यातिमाप्तो हि सः ।। १ ।।<br>
स्थानांगादिनवांगवृत्तिकरणप्राप्तप्रतिष्ठोदयाः<br>
श्रीमंतोभयदेवसूरिगुरवो रेजुश्चिरं तत्र वै ।<br>
श्रीमत्स्तंभनपार्श्वनाथजिनपप्राकट्यकृत्सद्गुणा-<br>
त्त्रैलोक्यप्रथितावदातयशसो लोकप्रमोदप्रदाः ।। २ ।।<br>
तत्पट्टे च विरेजुः कर्मग्रंथादिशास्त्रकर्त्तारः ।<br>
वैराग्यैकनिधानाः श्रीमज्जिनवल्लभाचार्याः ।। ३ ।।<br>
तत्पट्टपूर्वाचलतिग्मरश्मयो युगप्रधाना जिनदत्तसूरयः ।<br>
दिदीपिरे श्रावकलक्षबोधकाः सुरासुरैः संस्तुतपादपंकजाः ।। ४ ।।<br>
तेषां क्रमेण पट्टे श्रीजिनमाणिक्यसूरींद्राः ।<br>
आसन् विद्यावंतः सद्विश्वव्यापिमहिमानः ।। ५ ।।<br>
यावत् क्षोणितले जयंति तरणिज्योतीरथोनेहसः<br>
सन्नक्षत्रमितद्रुरामसुकथास्तावज्जयंत्वीश्वराः ।<br>
श्रीमच्छ्रीजिनचंद्रसूरिगुरवस्तत्पट्टपूर्वाचलो-<br>
द्यद्भानुनिभाः सभाजितमहावादिप्रवादप्रभाः ।। ६ ।।<br>
नानाखंडनमंडनस्मृतिपुराणच्छंदसीव्याकृतौ

Digitized by Google

वेदालंकृतिभव्यकाव्यप्रमुखे चाप्यस्तिमत्या धिया ।
जेतुं वांछति गीष्पतिं हि जयताल्लोके स सूरीश्वरः
श्रीमच्छ्रीजिनचंद्रसूरिसुगुरुः मद्रूपकामाभिजित् ॥ ७ ॥
मान्यो भूमिपतेस्त्रिविष्टपपतेर्वाचस्पतिर्वा भृशं
विद्यामोदितदेवतावरमनाः सत्सूरिमंत्राग्रणीः ।
धीमान्नंदतु रीहडाभिधकुलालंकारचूडामणिः
श्रीमच्छ्रीजिनचंद्रसूरिसुगुरुर्विख्यातकीर्तिश्चिरम् ॥ ८ ॥
अकब्बराख्यक्षितिपालनाथस्तत्तच्चमत्कारिगुणातिसक्तः ।
युगप्रधानेत्यभिधामचीकथत् स नंदतु श्रीजिनचंद्रसूरिः ॥ ९ ॥
तेषां धर्मे राज्ये विद्वत्साधंतयोधृसंयुक्ते ।
क्रूराजेति पटिष्ठे विजयिनि सन्नीतिविख्याते ॥ १० ॥
यस्याचार्यपदं ददे सुगुरुभिः स्वैरात्महस्तेन वै
दीव्यज्जीवदयापरायणमतेः सद्धर्मनिष्ठावतः ।
श्रीमल्लाभपुरे समृद्धिसहिते प्रोद्यन्महःपूर्वकं
राजच्छ्रीमदकब्बराभिधमहाभूपेश्वरस्याग्रहात् ॥ ११ ॥
देवेंद्रस्य गुरोर्विजेतरि सति स्वप्रज्ञया दिव्यया
नानाकर्कशतर्कखंडनमहाग्रंथादिसन्निष्ठया ।
कीर्तिस्वर्गिवहा हिमाचल इहे [वे] लायां चिरं जीवति
श्रीमछ्रीजिनसिंहसूरिसुगुरौ तस्मिन् प्रतिष्ठावति ॥ १२ ॥
विश्वख्यातगुणा गणाधिपतयः सार्वत्रिकख्यातयः
श्रीमच्छ्रीजिनराजसूरय इह क्ष्मायास्तले रेजिरे ।
तच्छिष्याश्च दिदीपिरे वरधियश्चारित्रचंचच्छ्रियः
श्रीमंतो जयसागराभिधमहोपाध्यायधुर्याश्चिरम् ॥ १३ ॥
गांभीर्यादिगुणैर्निजैर्जलधिवत्केनाप्यलब्धांतरा-
स्तत्पट्टप्रकटोदयाद्रिविमलालंकारसूरोदयाः ।
नानाशास्त्रविचित्ररत्ननिधयः श्रीरत्नचंद्राह्वयो-
पाध्यायाः स्वधिया पराजितसुराचार्या विरेजुः पुरा ॥ १४ ॥
तच्छिष्याः सकलाचलावलयसत्प्रख्यातकीर्त्युच्चयाः
सिद्धांतोदधिगाहनैकरसिका कारुण्यपाथोधयः ।
सद्भाग्योदयदीप्तपाठकपदश्रीराजिता रेजिरे-
दर्पिष्टप्रतिवादिमानमथनाः श्रीभक्तिलाभाभिधाः ॥ १५ ॥
सर्वप्राज्ञवरांगशेखरसदृग्वाक्सूरवाराग्रणी-
प्रागल्भ्यप्रवरास्तपोविधिपराः सद्बुध्युदाराशयाः ।

Digitized by Google

तेषामंतिषदो बभूवुरजिता दृप्यत्प्रवादिव्रजैः
श्रीमत्पाठकशेखरा मुनिवराश्चारित्रसाराह्वयाः ॥ १६ ॥
वैराग्यं प्रबलं शमोतिविमलः शास्त्रौघवार्त्ताद्भुता
सिद्धांतैकरुचिर्मनोरमतमा भव्योपकारः परः ।
चारित्रं च जगत्यनुत्तरतरं तत्पट्टशोभावहा
येषां श्रीयुतभानुमेरुगुरवस्ते वाचका भेजिरे ॥ १७ ॥
अस्मत्सतीर्थ्या राजंते तेजोरंगगणीश्वराः ।
सिद्धांतोक्तसदाचारपालनैकपरायणाः ॥ १८ ॥
शब्दप्रभेदशास्त्रे वृत्तिः शास्त्राणि वीक्ष्य संदृब्धा ।
तेषां शिष्यैर्दक्षैर्ज्ञानविमलपाठकश्रेष्ठैः ॥ १९ ॥
अस्मदंतिषदो गाढसाहाय्यात्सिद्धिमागता ।
विद्वच्छ्रीवल्लभाह्वस्य युक्तायुक्तविवेचिनः ॥ २० ॥
विमृश्य नानाविधशास्त्रवृंदमनेकशो वृत्तिरियं कृतास्ति ।
तथापि दोषाः किल संभवंति स्वबुद्धिमांद्यादुत मोहतो वै ॥ २१ ॥
प्रसादमाधाय विशोधयंतु विहाय तान् भोः खलु लब्धवर्णाः ।
अनेकशास्त्रौघपटिष्टपद्मप्रकाशनोदारगभस्तिपादाः ॥ २२ युग्मम् ॥
प्रथमादर्शे लिखितास्मच्छिष्यज्ञानसुंदराह्वेन ।
जयवल्लभगणिनापि च विचारज्ञेन भक्तेन ॥ २३ ॥
श्रीमद्विक्रमनगरे राजच्छ्रीराजसिंहनृपराज्ये ।
सल्लोकचक्रवाकप्रमोदसूर्योदये सम्यक् ॥ २४ ॥
चतुराननवदनेंद्रियरसवसुधासंमिते लसद्वर्षे ।
श्रीमद्विक्रमनृपतौ निक्रांतेतीव कृतहर्षे ॥ २५ ॥
शुभोपयोगे शुभयोगयुक्ते चरे द्वितीयादिवसेतिशुद्धे ।
आषाढमासस्य विशुद्धपक्षे पुष्यर्क्षसंयुक्तगभस्तिवारे ॥ २६ ॥
संदृब्धा वृत्तिरियं विद्वज्जनवृंदवाच्यमाना वै ।
तावन्नंदतु वसुधाचंद्रादित्यादयो यावत् ॥ २७॥ चतुर्भिः कुलकम् ॥
श्रीशांतिनाथजिनपश्रीमज्जिनकुशलसूरिगुरूणाम् ।
पठतामिह प्रसादाच्छ्रेमुष्ये वृत्तिरेषा स्तात् ॥ २८ ॥
अस्यास्त्रीणि सहस्राण्यधिकानि सप्तभिः शतैः ।
इत्येवं प्रमितिर्ज्ञेया श्लोकमानेन निश्चिता ॥ २९ ॥
इति श्रीस्वकीयगुरुपट्टावली समाप्ता ॥

Digitized by Google

No. 102.

# THE SÂRASAMUCHCHAYA. A COMPILATION FROM THE JAYANTÎ AND OTHER COMMENTARIES ON THE KÂVYAPRAKÂSA, BY RATNAKANTHA.

## काव्यप्रकाशटीका—सारसमुच्चयाख्या.

ॐ नमो नारायणाय ॐ

अत्र च साहित्यदीपिकाख्यटीकाकारः श्रीभास्करः ॥
न ते टीकाकाराः परिणमदविद्योधतमसं [सः]
प्रमेयं शास्त्राणां प्रतिफलति येषां न मतिषु ।
न टीकास्ता यासां विलसति—नालोकविषयान्
गभीरान् ग्रंथार्थान् गमयति न सिद्धांजनमिव ॥
टीकाः काव्यप्रकाशस्य कामं संतु परः शताः ।
किं ताभिः सुगमग्रंथमात्रव्याख्यानचंचुभिः ॥
यदस्ति तत्र सारांशः सोपि संगृह्यते मया ।
तेन टीकांतरालोककौतुकं त्यज्यतां – – – ॥
साहित्यदीपिका नाम टीका भास्करसूरिणा ।
मधूत्रहानां काव्यानां वेजनाय विरच्यते ॥

इदं तावदादिमेन श्लोकेन नमस्कारस्य वा प्रेक्षावत्प्रवृत्तेरंगभूतस्य प्रयोजनस्य वा काव्यलक्षणस्य वा प्रयोजनं प्रयुज्यंते न पुनः सर्वोत्कर्षेण प्रवृत्तेस्तदयं नियतिकृतनियमेत्यादिरुपन्यासो न संगच्छते इत्याशंक्याह ग्रंथारंभे इति अत्र परामर्शो नाम सर्वोत्कर्षेण स्तुतिर्न पुनरनुसंधानं तस्य स्मरणरूपत्वान्नियतिकृतेत्यादौ तदघटनात् यत्र सर्वोत्कृष्टत्वं तत्र नमस्कार्यत्वमिति व्याख्या नमस्कारात्यंतात् श्लोकस्य तत्परता गम्यते जयत्यर्थेन च नमस्कार आक्षिप्यते इति तां प्रत्यस्मि प्रणत इति लभ्यते इति ॥

निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनमिति

जयतिर्धातुरिति सर्वोत्कर्षे वर्त्तते एवं हि नमस्कारः साक्षादुपादीयतां किमाक्षेपेणेति चेन्न सर्वोत्कृष्टत्वप्रतिपादनेन सर्ववंद्यत्वं प्रकाश्यते वंदे भारतीमित्युक्ते तत्प्रकाशकं न स्यात् तर्हि नियतिकृतनियमरहितादिविशेषणविशिष्टां निर्मितिमादधतीं कवेर्भारतीं वंदे इति किं नोच्यते इति चेन्न सर्वोत्कृष्टत्वप्रतिपादने तात्पर्यात् समुचितशब्देन साधारणी युक्ता च देवता गृहीता भक्तिश्रद्धातिशयविषयभूता इष्टा गणेश्वरादिदेवता मनसि स्वकीयं कर्म प्रारभते यत्र तु वाग्देवता प्रतिपाद्यते तत्र सा युक्त्या काव्यमीमांसायाः प्रारंभे वाग्देवताधिकृतेत्युक्तं भवति ।

इति भास्कर्याम्



Digitized by Google

अत्र श्रीवत्सवर्मा सारबोधिनीटीकाकारः ॥
मंगलपरां प्रथमकारिकाव्याख्यामवतारयति ग्रंथेत्यादि

No. 143.

## THE KERALAPRAŚNA.

## केरलप्रश्नः

आ॰ ॥ श्रीगणेशाय नमः ॥
साक्षात्त्रिलोक्यसंबोधं प्रश्नं केरलभाषितम् ॥
त्रिकालविषयं प्रोक्तं तस्मै केरलये नमः ॥ १ ॥
ज्ञानदीपकमासाद्य वृत्तिं कृत्वा सदक्षरैः ।
स्वरस्नेहेन संयोग[ज्य] ज्वालयेदुत्तरैर्धनैः ॥ २ ॥
च॰ इदानीं लग्नं पिंडो द्वादशेन भक्तः शेषे क्रमान्मेषादिः
इतिश्रीमूलदेवोक्तं केरलप्रश्नं संपूर्णम्

No. 156.

## THE TÂJIKATANTRASÂRA BY SAMARASINHA, WITH THE COMMENTARY BY NÂRÂYANA.

## ताजिकतन्त्रसारः सटीकः मू॰ समरसिंहः टी॰ नारायणः

मू॰ आ॰ ॥ नत्वा गिरं गणपतिं ग्रहवर्गमुख्यं
तं कर्मसाक्षिणमलक्ष्यगुणं गुरुं च ।
श्रीखिदकोक्तगुरुताजकतंत्रदीपात्
कर्मप्रकाशमणुदीपकमुद्धरामि ॥ १ ॥
टी॰ आ॰ ॥ उद्यत्कोटिदिवाकरद्युतिनिभं रक्तांगरागांशुकं........
मू॰ च॰ त्रैलोक्यक्षितिपालमौलिसकलव्यापारपारंगमः
प्राग्वाटाम्बरसार्वभौमसचिवः श्रीचण्डसिंहाह्वयः ।
श्रीमान् शोभनदेव इत्यभिजने तस्याभवत्सज्जनः
श्रीसामंत इति प्रशांतसुमतिस्तस्मादभूदंगभूः ॥
तस्यात्मजः समजनिष्ट कुमारसिंह-
नामाप्रमाणमेरुगिरिसाम्यगेहे [ नामा प्रमाणगुणमेरुगिरिः समाजे]
तत्सूनुना वणकृनृगंमुभे [गणकभृंगमुदे] स्मरेण
गन्धोभ्युदाह्वित [गंधोभ्युदाध्रियत] ताजिकपद्यकोशात् ॥
टी॰ च॰ कामार्थमित्यादि श्लोकाः स्पष्टार्थाः ॥

Digitized by Google

इति सामुद्रिकोपनामनारायणकृतायां श्रीप्राग्वाटाम्बरा [टान्वय] कुमारसिंहात्मजस्मरसिंहसमुद्धृतताजिकतंत्रसारकर्मप्रकाशापरनामधेयमनुष्यजातकस्य वृत्तौ प्रकीर्ण्णनिर्णयाधिकाराध्यायः ॥ ३ ॥

खुन्नुः खुत्तो रोमकश्च हिलाजो धिषणाह्वयः ।
दुर्मुखाचार्य इत्येते ताजकस्य प्रवर्त्तकाः ॥

No. 162.

THE PADMALÎLÂVILÂSINÎ BY NÂRÂYAṆA.

**पद्मलीलाविलासिनी करणग्रन्थः—नारायणः.**

आ० श्रीगणेशाय नमः ॥

श्रीगुरुं परमानंदं वराभयकरं शिवम् ।
अरुणाकरकांतांकं शिरसा प्रणिपत्य च ॥ १ ॥
सिंदूरारुणशोभांगं दिव्याभरणभूषितम् ।
पाशांकुशधरं देवं नत्वा सिद्धिविनायकम् ॥ २ ॥
तडिद्दीप्तिदि[दृ]गंतां तां बालार्कारुणभासुराम् ।
शरच्चंद्रकलाकीर्णा पश्यंतीं भुवनत्रयम् ॥ ३ ॥
तुर्यमध्याब्जसदनां वैखर्य्या मनसा स्तुताम् ।
तामाचिंत्यां परां देवीं महालक्ष्मीं प्रणम्य च ॥ ४ ॥
बालावबोधजननीं दृक्तुल्यज्ञानदायिनीम् ।
कुर्वे यद्गतिमाख्येन पद्मलीलाविलासिनीम् ॥ ५ ॥

च० त्रिसंगुणोज्वलत्कालः शुभः पुण्येन मंगले ॥ १२ ॥
इति श्रीपद्मलीलविलासिन्यां पाताधिकारः ११ ॥
इति श्रीमत्पंडितनारायणकृतपद्मलीलाविलासिनीकरणग्रंथः समाप्तिमगमत् ॥

No. 194.

THE VṚITTAŚATAKAM BY MAHEŚVARA.

**वृत्तशतकम्—महेश्वरः.**

आ० श्रीगणेशाय नमः ॥

ब्रह्मेशचंद्रेशदिवाकराग्निवस्वादिरूपाणि सुरस्य यस्य ॥
नत्वाच्युतं तं व्यवहारसिद्ध्यै महेश्वरो वृत्तशतं करोति ॥ १ ॥

च० आदौ त्याज्यविधिस्तथा च भविधिः प्रोक्तो विधिः संस्कृते-
रुद्वाहोग्निपरिग्रहो ग्रहविधिर्भूपाभिषेकः क्रमात् ॥
यात्रागोचरसंक्रमादिकविधिर्देवप्रतिष्ठाविधि-

Digitized by Google

श्वक्रे वृत्तशतं मनोरथसुतो दृष्ट्वान्यशास्त्राण्यदः ॥
इति श्रीमहेश्वरकृतं वृत्तशतकं समाप्तम् ॥

No. 201.

## KANDARPACHÛḌÂMAṆI BY VÎRABHADRA.

### कंदर्पचूडामणिः वीरभद्रः ।

श्रीभैरवाय नमः ।

आ० अरुणापि दक्षकोपाद्भक्त्यनुरक्तेषु सानुरागेव ।
कल्याणाय जगत्या दृष्टिः श्रीभैरवस्यास्तु ॥ १ ॥
प्रणमत रहसि सतृष्णं कृष्णं स्मरशास्त्रपारगं विज्ञाः ।
पीयूषादपि मधुरेधराबिम्बे गोपकन्यायाः ॥ २ ॥
मन्त्री वसन्तसमयो यस्य च राजीवलोचना राज्यम् ।
वाहा मलयसमीराः पञ्चशरोसौ नृपो जयति ॥ ३ ॥
वंशः कंसद्विष इव जयति बघेलस्य भूभुजां मान्यः ।
अजघन्योस्ति जगत्यां यस्मादन्यो न भूपालः ॥ ४ ॥
प्रादुर्बभूव वंशे तत्र श्रीशालवाहनो नृपतिः ।
इन्दुर्मरन्दबिन्दुर्यस्य यश[ः] पुण्डरीकस्य ॥
भिन्नस्य शीतमहसः सुषिरं लक्ष्मेति मन्यते लोकः ।
विधुरैर्यदीयविधुरैर्निशि निहतैर्भास्करभ्रान्त्या ॥ ६ ॥
प्रादुर्बभूव तस्माद्वीरः श्रीवीरसिंहाख्यः ।
यस्य यशोम्बुजकोशे स्फारा मकरन्दबिन्दवस्ताराः ॥
यस्य करेण करादिह समरे रिपुवारणाधिपतेः ।
दानाम्बुसङ्गशोभा सातिशया लुण्ठिता झटिति ॥ ८ ॥
वीरस्तदङ्गजन्मा प्रतिभटपृतनातमस्विनीभानुः ।
श्रीवीरभानुनामाधिपतिरभूद्भुजां जगति ॥
श्रुत्वापि वीरभानोर्दानकथा नेह जातलज्जानि ।
वृक्षोपलपशुभावाद्दिवततरुधेनुरत्नानि ॥ १० ॥
कामादप्यभिरामो भीमादपि बाहुशालिनां मान्यः ।
कर्णादपि च वदान्यो जयति सुतो रामचन्द्रोस्य ॥ ११ ॥
श्रीरामेणारब्धे दाने गजवाजिनोर्मुखैक्येन ।
वक्राननो गणपतिर्भीत्याभूत्तुम्बुरुः खचरः ॥ १२ ॥
राजोचितगुणसीमा भीमावरजादिहाधिको धनुषि ।
तनयो विनयसमुद्रो जयतितरां वीरभद्रोस्य ॥ १३ ॥

Digitized by Google

विद्यायां सुरगुरुरिव सौन्दर्ये पञ्चबाणतोप्यधिकः ।
दाने कल्पतरोरयमुपमेयस्तेन केनेह ॥ १४ ॥
चूडामणिं स्मृतिभुवो ग्रन्थं श्रीपञ्चबाणशास्त्रेसौ ।
वात्स्यायनानुरुद्धं कुरुते कुतुकात्तदङ्घ्रिभृत्तिः ॥ १५ ॥
च० इत्यवधाय निबन्धानवलोक्यासौ स्मरागमे निपुणः ।
अकृत स्फुटतत्वानि हि वात्स्यायनकामसूत्राणि ॥ ४२ ॥
श्रीरामचन्द्रनन्दनवीरश्रीवीरभद्रदेवेन ।
एका – – – मतिना निर्णीतः कामसूत्रार्थः ॥ ४३ ॥
यः कर्णति वसुदाने पार्थति समरोत्सवावदातेषु ।
धर्मे धर्मति रूपे नकुलति सहदेवति ज्ञाने ॥ ४४ ॥
शरदिन्दुबिम्बगौरास्मरहरसदृशाच्छकीर्तिचन्द्रेण ।
हरभालानलविषमप्रतापतापेन तेनेह ॥ ४५ ॥
सप्ताधिकरणमेतत्षट्त्रिंशत्परिमितस्फुटाध्यायम् ।
वात्स्यायनकृतशास्त्रं व्याख्यातं वीरभद्रेण ॥ ४६ ॥
दृष्ट्वैतदस्फुटार्थान्यपिसूत्राणीह कामशास्त्रस्य ।
बुद्ध्वा रचयत धीरा लीलाश्चेतोभुवोनुमताः ॥ ४७ ॥
यावन्मुरभिदि लक्ष्मीः शंभोर्वामाङ्कम[के]द्रिजा यावत् ।
तावदसौ स्मरकुतुकं ग्रन्थः प्रख्यापयन्नस्तु ॥ ४८ ॥
हरलोचनहरलोचनरसशशिभिर्विश्रुते वर्षे ।
फाल्गुनशुक्लप्रतिपदि पूर्णो ग्रन्थः स्मरस्मेरः ॥ ४९ ॥
श्रीवीरकृतिना शास्त्रेसमबाणशासनानुसृते ।
औपनिषदाधिकरणे चरमोध्यायः कृतः पूर्णः ॥
कंदर्पचूडामणिनामा ग्रन्थः समाप्तः ।

No. 214.

## THE CHIKITSÂKALIKÂ BY TÎSAṬADEVA.

## चिकित्साकलिका—तीसटः.

आ० श्रीधन्वंतरये नमः

प्रणम्य पाराशरसुश्रुतादीन् भक्त्या नमस्कृत्य पितुश्च पादान् ।
कृता चिकित्साकलिकेति योगैर्माला सरोजैरिव तीसटेन ॥ १ ॥
हारीतसुश्रुतपराशरभोजभेडभृग्वग्निवेशचरकादिचिकित्सिकोक्तैः ।
एभिर्गणैश्च गुणवद्भिरतिप्रसिद्धैर्धान्वंतरीयरचनारुचिरप्रबन्धैः ॥ २ ॥
अल्पश्रुतस्य भिषजः किल सुश्रुतादिशास्त्रोदधौ मतिरबोधदृढप्रमूढा ।
अस्मद्विधग्रथितयोगसमुच्चये तु बध्नातु बुद्धिमबुधः सुभिषग्वरो वा ॥ ३ ॥

Digitized by Google

च० पशुपतिरिव चूर्णः सर्वकुष्टानि हन्यात् ॥ ४१२ ॥
इति वाग्भट्टसूनुना तीसटदेवेन रचितं चिकित्साशास्त्रम् ।
इति चिकित्साकलिका समाप्तिमगमदियम् ॥

## No. 273.

## VASUNANDI'S ÂCHÂRAVṚITTI.

**आचारसूत्रम् सटीकम् मू० वट्टकेराचार्यः टी० वसुनन्दिः ॥**

आ० ॐ नमो वीतरागाय ॥

श्रीमच्छुद्धेद्धबोधं सकलगुणनिधिं निष्ठिताशेषकार्यं
वक्तारं सत्प्रवृत्तेर्निहतमतिमलं शक्रसंवंदितांघ्रिं ।
भर्त्तारं मुक्तिवध्वा विमलसुखगतेः कारिकायाः समंता-
दाचारस्यात्तनीतेः परमजिनकृतेर्नौम्यहं वृत्तिहेतोः ॥ छ ॥

श्रुतस्कंधाधारभूतमष्टादशसहस्रपदपरिमाणं मूलगुणप्रत्याख्यानसंस्तरस्तवाराधनासमयाचारपंचाचारपिंडशुद्धिषडावश्यकद्वादशानुप्रेक्षानागारभावनासमयसारशीलगुणप्रस्तारपर्याप्त्याद्यधिकारनिबद्धमहार्थगंभीरं लक्षणसिद्धपदवाक्यवर्णोपचितं घातिकर्मक्षयोत्पन्नकेवलज्ञानप्रबुद्धाशेषगुणपर्यायखचितषड्द्रव्यनवपदार्थजिनवरोपदिष्टं द्वादशविधतपोनुष्ठानोत्पन्नानेकप्रकारर्द्धिसमन्वितगणधरदेवरचितं मूलगुणोत्तरगुणस्वरूपविकल्पोपायसाधनसहायफलनिरूपणप्रवणमाचारांगमाचार्यपारंपर्यप्रवर्त्तमानमल्पबलमेधायुःशिष्यनिमित्तं द्वादशाधिकारैरुपसंहर्तुकामः स्वस्य श्रोतृणां च प्रारब्धकार्यप्रत्यूहनिराकरणक्षमं शुभपरिणामं विदधत् श्रीवट्टकेराचार्यः प्रथमतरं तावन्मूलगुणाधिकारप्रतिपादनार्थं मंगलपूर्विकां प्रतिज्ञां विधत्ते मूलगुणेष्वित्यादि ॥ छ ॥

मूलगुणेसु विसुद्धे वंदित्ता सव्वसंजदे सिरसा ॥
इहपरलोयहिदत्थे मूलगुणे कित्तइस्सामि ॥ १ ॥

मंगलनिमित्तहेतुपरिमाणनामकर्तॄन् धात्वादिभिः प्रयोजनाभिधेयसंबंधांश्च व्याख्याय पश्चादर्थः कथ्यत इति मूलगुणेसु । मूलानि च तानि गुणाश्च ते मूलगुणाः मूलशब्दोनेकार्थे यद्यपि वर्त्तते तथापि प्रधानार्थे वर्त्तमानः परिगृह्यते तथा गुणशब्दोप्यनेकार्थे यद्यपि वर्त्तते तथाप्याचरणविशेषे वर्त्तमानः परिगृह्यते मूलगुणाः प्रधानानुष्ठानानि उत्तरगुणाधारभूतानि तेषु मूलगुणेषु विषयभूतेषु कारणभूतेषु वा सत्सु ये विशुद्धा निर्मलाः संजातास्तान् मूलगुणेषु विशुद्धान् वंदित्ता । वंदित्वा मनोवाक्कायक्रियाभिः प्रणम्य सव्वसंजदे । अयं सर्वशब्दो निरवशेषार्थवाचकः परिगृहीतो बह्वनुग्रहकारित्वात्तेन प्रमत्तसंयताद्ययोगिपर्यंता भूतपूर्वगत्या सिद्धाश्च परिगृह्यंते सम्यक्संयताः पापक्रियाभ्यो निवृत्ताः सर्वे च ते संयताश्च

Digitized by Google

सर्वसंयतास्तान् सर्वसंयतान् प्रमत्तापमत्तापूर्वकरणानिवृत्तिकरणसूक्ष्मसंपरायोपशांतकषायक्षीणकषायसयोगिकेवल्ययोगिकेवलिसंयतान् सप्ताद्यष्टपर्यंतषण्णवमध्यसंख्यासमेतान् सिद्धांश्चानंतान् । सिरसा । शिरसा मस्तकेन मूर्ध्ना । इहपरलोगहिदत्थे । इहशब्दः प्रत्यक्षवचनः परशब्दः उपरतेंद्रियजन्मवचनः लोकशब्दः सुरेश्वरादिवचनः इहश्च परश्चेहपरौ तौ च तौ लोकौ च इहलोकपरलोकौ ताभ्यां तयोर्वा हितं सुखैश्वर्यपूजासत्कारचित्तनिवृत्तिफलादिकं तदेवार्थः प्रयोजनं फलं येषां ते इहपरलोकहितार्थास्तान् इहलोकपरलोकसुखैश्वर्यादिनिमित्तान् इहलोके पूजां सर्वजनमान्यतां गुरुतां सर्वजनमैत्रीभावादिकं च लभते मूलगुणानाचरन् परलोके च सुरैश्यं तीर्थकरत्वं चक्रवर्तिबलदेवादिकत्वं सर्वजनकांतादिकं च मूलगुणानाचरन् लभत इति । मूलगुणे । मूलगुणान् सर्वोत्तरगुणाधारतां गतानाचरणविशेषान् । कित्तइस्सामि । कीर्त्तयिष्यामि व्याख्यास्यामि ।। अत्र संयतशब्दस्य चत्वारोर्थाः ।। नाम स्थापना द्रव्यं भाव इति ।। तत्र जातिद्रव्यगुणक्रियानिरपेक्षं संज्ञाकर्म नामसंयतः । संयतस्य गुणान् बुद्ध्याध्यारोप्याकृतिवत्यनाकृतिवति च वस्तुनि स एवायमिति स्थापिता मूर्त्तिः स्थापनासंयतः । संयतस्वरूपप्रकाशनपरिज्ञानपरिणतिसामर्थ्याध्यासितोऽनुपयुक्त आत्मा आगमद्रव्यसंयतः नोआगमद्रव्यसंयतः नोआगमद्रव्यं ज्ञायकशरीरं संयतप्राभृतज्ञस्य शरीरं भूतं भवन् भावि वा भविष्यत्संयतत्वपर्यायो जीवो भावसंयतः । तद्व्यतिरिक्तमसंभविकर्म नोकर्म तयोः संयतत्वस्य कारणत्वाभावात्संयतगुणव्यावर्णनपरप्राभृतज्ञ उपयुक्तः सम्यगाचरणसमन्वित आगमभावसंयतस्तेनेह प्रयोजनं कुतः मूलगुणेषु विशुद्धानिति विशेषणादिति मूलगुणादिस्वरूपावगमनं प्रयोजनं ननु पुरुषार्थो हि प्रयोजनं न च मूलगुणादिस्वरूपावगमनं । तस्य धर्मार्थकाममोक्षत्वात् यद्येवं सुष्टु मूलगुणस्वरूपावगमनं प्रयोजनं यतस्तेनैव ते धर्मादयो लभ्यंते । इति मूलगुणैः शुद्धस्वरूपं साध्यं साधनमिदं मूलगुणशास्त्रं साध्यसाधनरूपः संबंधोपि शास्त्रप्रयोजनयोरतएव वाक्याल्लभ्यते । अभिधेयभूता मूलगुणाः तस्माद्ग्राह्यमिदं शास्त्रं प्रयोजनादित्रयसमन्वितत्वादिति । सर्वसंयतान् शिरसाभिवंद्य मूलगुणान् इहपरलोकहितार्थान्कीर्त्तयिष्यामीति पदघटना अथवा मूलगुणसंयतानामयं नमस्कारो मूलगुणान् सुविशुद्धान् संयतांश्च वंदित्वा मूलगुणान्कीर्तयिष्यामि च शब्दोनुक्तोपि द्रष्टव्यः ।। यथा पृथिव्यापस्तेजोवायुराकाशमित्यत्र मूलगुणकथनप्रतिज्ञां निर्वहन्नाचार्यः संग्रहसूत्रगाथाद्वयमाह।।छ।।

पंचयमहव्वयाइं समिदीओ पंच जिणवरुद्दिट्ठा ।
पंचेवेंदियरोहा छप्पिय आवासया लोचे ।।

च० त [च]त्तोरालियदेहो णामा[मं]गोदं च केवलीजुगवं ।
आउगवेदणियं च हि खिवइत्ता णीरदो होदि ।। २०६ ।।

Digitized by Google

तत उर्द्धं सयोगकेवलीऔदारिकशरीरं सनिश्वास एवायं नामगोत्रकर्मणी आयुर्वेदनीयं च युगपत् क्षपयित्वा नीरजाः सिद्धो भवति विशेषमाह ॥ अयोगिकेवली आत्मकालद्विचरमसमयेनुदयवेदनीयदेवगतिं पंचशरीरसंघातपंचशरीरबंधनषट्संस्थानत्र्यंगोपांगषट्संहननपंचवर्ण्णद्विगंधपंचरसाष्टस्पर्शदेवगतिप्रयोग्यानुपूर्व्यागुरुलघूपघातपरघातोच्छ्वासविहायोगत्यपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभदुर्भगसुस्वरदुःस्वरानादेयायशःकीर्तिनिर्माननीचैर्गोत्राणि एता द्वासप्ततिप्रकृतीः क्षिपयति ततोऽनंतरसोदयवेदनीयमनुष्यायुर्मनुष्यगतिपंचेंद्रियजातिमनुष्यगतिप्रायोग्यानुपूर्व्यात्रसबादरपर्याप्तसुभगादेययशः कीर्त्तितीर्थकरनामोच्चैर्गोत्रसंज्ञकास्त्रयोदशप्रकृतीश्चरमसमये क्षपयति ततो द्रव्यरूपमौदारिकशरीरं त्यक्त्वा नीरजा निर्म्मलः सिद्धो निर्लेपः सर्वद्वंद्वरहितोनंतज्ञानदर्शनसुखवीर्यसमन्वितोक्षयो युगपत्सर्व्वद्रव्यपर्यायावभासकोनंतगुणाधारः परमात्मा भवतीति ॥ छ

वृत्तिः सर्व्वार्थसिद्धिः सकलगुणनिधिः सूक्ष्मभावानुवृत्ति-
राचरस्यात्तनीतेः परमजिनपतेः ख्यातनिर्दोषवृत्तेः ।
शुद्धैर्वाक्यैः सुसिद्धा कलिमलमथनी कार्यसिद्धिर्मुनीनां
स्थेयाज्जैनेंद्रमार्गे चिरतरमवनौ वासुनंदी सुभावा ॥
इति मूलाचारविवृत्तौ द्वादशोध्यायः ॥ छ ॥
कुंदकुंदाचार्यप्रणीतमूलाचाराख्यविवृतिः परिपूर्ण्णा ॥
कृतिरियं वसुनंदिनः श्रीश्रमणस्य ॥ छ ॥

अथ प्रशस्तिपाठः ॥

प्रणमामि महावीरं सिद्धं शुद्धं जिनेश्वरं ॥
यस्य ज्ञानांबुधौ भाति जगद्विरूपसंस्थितं ॥ १ ॥
कृतात्मानो जना यत्र कर्म प्रक्षिप्य हेलया ।
रंमते मुक्तिलक्ष्मीं तज्जैनं जयति शासनं ॥ २ ॥
जयंतु गौतमस्वामिप्रमुखा गणनायकाः ॥
सूरयो जिनचंद्रांताः श्रीमंतः क्रमदेशकाः ॥ ३ ॥
वर्षे षडेकपंचैकपूरणे विक्रमेनतः ॥
शुक्ले भाद्रपदे मासे नवम्यां गुरुवासरे ॥ ४ ॥
श्रीमद्वट्टेरकाचार्यकृतसूत्रस्य सद्विधेः ।
मूलाचारस्य सद्वृत्तेर्दातुर्नामावलिं ब्रुवे ॥ ५ ॥
श्रीजंबूपपदे द्वीपे क्षेत्रे भरतसंज्ञके ॥
कुरुजांगलदेशोस्ति यो देशः सुखसंपदां ॥ ६ ॥
तत्रास्ति हास्तिनो नाम्ना नगरी नागरीयसी ॥
शांतिकुंथ्वरतीर्थेशा यत्रासन्निंद्रवंदिताः ॥ ७ ॥

Digitized by Google

विद्यते तत्समीपस्था श्रीमती योगिनीपुरी ॥
यां पाति पातिसाहिश्रीवेहलोलाभिधो नृपः ॥ ८ ॥
तस्याः प्रत्यग्दिशि ख्यातं श्रीहिसारपिरोजकं ॥
नगरं नगरंभादिवल्लीराजिविराजितं ॥ ९ ॥
तत्र राज्यं करोत्येष श्रीमान् कुतबखानकः ॥
तथा हैवतिखानश्च दाता भोक्ता प्रतापवान् ॥ १० ॥
अथ श्रीमूलसंघेस्मिन्नंदिसंघेनघेजनि ॥
बलात्कारगणस्तत्र गच्छः सारस्वतस्त्वभूत् ॥ ११ ॥
तत्राजनि प्रभाचंद्रः सूरिचंद्रोजितांगजः ॥
दर्शनज्ञानचारित्रतपोवीर्यसमन्वितः ॥ १२ ॥
श्रीमान् बभूव मार्तंडस्तत्पट्टोदयभूधरे ॥
पद्मनंदी बुधानंदी तमच्छेदी मुनिप्रभुः ॥ १३ ॥
तत्पट्टांबुधिसच्चंद्रः शुभचंद्रः सतांवरः ॥
पंचाक्षवनदावाग्निः कषायक्ष्माधराशनिः ॥ १४ ॥
तदीयपट्टांबरभानुमाली क्षमादिनानांगुणरत्नशाली ।
भट्टारकश्रीजिनचंद्रनामा सैद्धांतिकानां भुवि योस्ति सीमा ॥ १५ ॥
स्याद्वादामृतपानतृप्तमनसो यस्यातनोत्सर्व्वतः ।
कीर्तिर्भूमितले शशांकधवला सज्ञानदानात्सतः ॥
चार्वाकादिमतप्रवादितिमिरोष्णांशोर्मुनींद्रप्रभोः ।
सूरेः श्रीजिनचंद्रकस्य जयतात्संघो हि तस्यानघः ॥ १६ ॥
तच्छिष्याबहुशास्त्रज्ञा हेयादेयविचारकाः ।
शमसंयमसंपूर्णा मूलोत्तरगुणान्विताः ॥ १७ ॥
जयकीर्त्तिश्चारुकीर्तिर्जयनंदी मुनीश्वरः
भीमसेनादयोन्ये च दश धर्म्मधरा वराः ॥ १८ ॥ युग्मं ॥
अस्ति देशव्रताधारी ब्रह्मचारी गुणाग्रणीः ॥
नरसिंहोभिधानेन नानाग्रंथार्थपारगः ॥ १९ ॥
तथा भूरिगुणोपेतो भूरानामा महत्तमः ॥
श्रीमानश्वपतिश्चान्यः सुमतिर्गुरुभक्तिकृत् ॥ १९ ॥
अन्यो नेमाभिधानोस्ति नेमिर्द्धर्म्मरथस्य यः ।
परस्त्रीकमसंज्ञश्च ज्ञातयज्ञोस्तमन्मथः ॥ २० ॥
भवांगभोगनिर्व्विण्णस्तिहुणाख्योपरो मतः ।
सम्यक्त्वादिगुणोपेतः कषायदववारिदः ॥ २१ ॥
ढाकाख्यो ब्रह्मचार्यस्ति संयमादिगुणालयः ।



Digitized by Google

सर्वे ते जिनचंद्रस्य सूरेः शिष्या जयंत्विह ॥ २२ ॥
श्रीमान् पंडितदेवोस्ति दाक्षिणात्योद्विजोत्तमः ॥
यो योग्यः सूरिमंत्राय वैयाकरणतार्किकः ॥ २३ ॥
अग्रोतवंशजः साधुर्ल्हवदेवाभिधानकः ॥
तत्सुतोधरणः संज्ञा तद्भार्या भीषुही मता ॥ २४ ॥
तत्पुत्रो जिनचंद्रस्य पादपंकजषट्पदः ॥
मीहाख्यः पंडितस्त्वास्ति श्रावकव्रतभावकः ॥ २५ ॥
तदन्वयेथखडेलवंशे श्रेष्ठीयगोत्रके ॥
पद्मावत्याः समाम्नाये यक्षाः पार्श्वजिनेशिनः ॥ २६ ॥
साधुः श्रीमोहणाख्योभूत्संघभारधुरंधरः ॥
तत्पुत्रो रावणो नाम पंचाणुव्रतपालकः ॥ २७ ॥
तस्य पुत्रौ समुत्पन्नौ पार्श्वचोषाभिधानकौ ॥
कल्पवृक्षसमौ दाने जिनपादाब्जषट्पदौ ॥ २८ ॥
साधोः पार्श्वस्य भार्याभूदाद्या पद्मिनिसंज्ञका ॥
पद्मनाथस्य पद्मेव सती पद्मानना मता ॥ २९ ॥
सूहेनाम्नी द्वितीयाभूद्या सौभाग्येन पार्वतीं ॥
रतिं रूपेण शीलेन सीतां जितवती सती ॥ ३० ॥
साधन्याः संति पाग्रन्यस्त्रियः पुत्राहितावहाः ॥
रूपवंतः कलावंतो दयावंतः प्रियंवदाः ॥ ३१ ॥
तत्राद्यः साधुभीमाख्यो निजवंशविभूषणः ॥
उपार्जयति वित्तं यः पात्रदानाय केवलं ॥ ३२ ॥
रुक्मिणी नामतस्ततस्य गेहिनी शीलशालिनी ॥
स्ववाचा कोकिला जिग्ये कांत्या भा सवितुर्थया ॥ ३३ ॥
चत्वारः संति तत्पुत्रास्तोल्हातेजाभिधानकौ ॥
भोजाखिउराजनामानौ प्रफुल्लकमलाननाः ॥ ३४ ॥
तेल्हाख्यस्य मता भार्या तोल्हश्रीः श्रीनिवासिनी ॥
साढाभिधोस्ति तत्पुत्रो दीर्घायुः सभवेदिह ॥ ३५ ॥
पत्नी तेजाभिधानस्य तेजश्रीर्लज्जयान्विता ॥
भोजाख्यस्य तथा भार्या भोजश्रीर्भक्तिकारिणी ॥ ३६ ॥
पार्श्वसाधोर्द्वितीयोस्ति नेमाख्यो नियमालयः ॥
श्रीमान् विनयसंपन्नः सज्जनानंददायकः ॥ ३७ ॥
गेहिनी तस्य नीकाख्या रतिर्वा मन्मथस्य वै ॥
या जिगाय स्वनेत्राभ्यां स्फुरद्भयां चकितां मृगीं ॥ ३८ ॥

Digitized by Google

तस्याः पुत्रोस्ति विझाख्यो विद्याधरः प्रियंवदः ॥
ज्ञातीनां नंदयामास विनयादिगुणेन यः ॥ ३९ ॥
पार्श्वपुत्रस्तृतीयोस्ति नेमाख्यो नियमालयः ॥
देवपूजादिषट्कर्मपद्मिनीखंडभास्करः ॥ ४० ॥
साभूनाम्नी तु तज्जाया रूपलज्जावती सती ॥
वस्तासुरजनौ तस्याः सुतौ जनमनोहरौ ॥ ४१ ॥
पार्श्वभार्याद्वितीया या सूहोनाम्नीति तत्सुतः ।
ईश्वराह्वो कलावासः कलुषापेतमानसः ॥ ४२ ॥
साधुचोषाभिधानस्य स्ववंशांबरभास्करः ॥
उमानाम्न्यस्ति सद्भार्या शीलनिककलालया ॥ ४३ ॥
तस्या अंगरुहौ ख्यातौ सत्यभूषाविभूषितौ ॥
लक्ष्मीवंतौ महांतौ तौ पात्रदानरतौ हि तौ ॥ ४४ ॥
तयोराद्योस्ति संघेशो नृसिंहः पद्मसिंहकः ।
चकार नेमिनाथस्य यात्रां यो दुःखहारिणीं ॥ ४५ ॥
तत्कलत्रं लसद्गात्रं पद्मश्रीर्नाम कामदं ॥
गृहे पात्रे समायाते या दानं दयते चिरं ॥ ४६ ॥
तस्य पुत्रास्त्रयः संति दीर्घायुषो भवंतु ते ॥
हेमराजो गजमल्लोपरः श्रवणसंज्ञकः ॥ ४७ ॥
चोषापुत्रो द्वितीयोस्ति रूल्हानामा गुणाकरः ।
रूल्हश्रीर्म्महिला तस्य देवराजाख्य अंजगः ॥ ४८ ॥
एतैः श्रीसाधुपार्श्वस्य चोषाख्यस्य च कायजैः ॥
वसद्भिर्झूझणूस्थाने रम्ये चैत्यालयैर्वरैः ॥ ४९ ॥
चाहमानकुलोत्पन्ने राज्यं कुर्व्वति भूपतौ ॥
श्रीमत्समसखानाख्ये न्यायान्यायविचारके ॥ ५० ॥
सूरिश्रीजिनचंद्रस्य पादपंकजषट्पदैः ॥
साधुभीमादिभिः सर्व्वैः साधुपद्मादिभिस्तथा ॥ ५१ ॥
कारितं श्रुतपंचम्या महदुद्यापनं च तैः ।
श्रीमद्देशव्रताधारिनरसिंहोपदेशतः ॥ ५२ ॥ चतुष्कलं ॥
तदा तैर्जिनबिंबानामभिषेकपुरस्सरा ॥
कारितार्चा महाभक्त्या यथायुक्ति च सोत्सवा ॥ ५३ ॥
भृंगारकलशादीनि जिनावासेषु पंचसु ॥
क्षिप्तानि पंच पंचैव चैत्योपकरणानि च ॥ ५४ ॥
एतच्छास्त्रादिभक्त्या तैर्ज्ञानदानमदायि च ।

Digitized by Google

ब्रह्मश्रीनरसिंहाख्यतिहुणादियतीशिने ॥ ५५ ॥
चतुर्विधाय संघाय सदाहारश्चतुर्विधः
प्रादाय्यौषधदानं च वस्त्रोपकरणादि च ॥ ५६ ॥
मित्रयाचकहीनेभ्यः प्रीतितुष्टिकृपादि च ॥
दानं प्रदत्तमित्यादिधनव्ययोव्यधायितैः ॥ ५७ ॥
इत्थं सप्तक्षेत्र्यां चयते यो दानमात्मनो भक्त्या ॥
लभते तदनंतगुणं परत्र सोत्रापि पूज्यः स्यात् ॥ ५८ ॥
एतच्छास्त्रं लेखयित्वा हिसारादानाय्य स्वोपार्जितेन स्वराया ।
संघेशश्रीपद्मसिंहेन भक्त्या सिंहांताय श्रीनराय प्रदत्तं ॥ ५९ ॥
यो दत्ते ज्ञानदानं भवति हि स नरो निर्जराणां प्रपूज्यो
भुक्त्वा देवांगनाभिर्विषयसुखमनुप्राप्य मानुष्यजन्म ॥
भुक्त्वा राज्यस्य सौख्यं भवतनुखसुखान्निस्पृहीकृत्य चित्तं
लात्वा दीक्षां च बुध्वा श्रुतमपि सकलं ज्ञानमंत्यं लभेत ॥६०॥
ज्ञानदानाद्भवेज्ज्ञानी सुखी स्याद्भोजनादिह ॥
निर्भयोभयतो जीवो नीरुगौषधदानतः ॥ ६१ ॥
धर्म्मतः सकलमंगलावली धर्मतो भवति मुंडकेवली ॥
धर्म्मतो जिनसुचक्रभृद्बली नाथतद्रिसुमुखो [नापतेंद्रिपुमुखे] नरो बली॥६२॥
ज्ञात्वेति कुर्व्वंतु जनाः सुधर्म्मं सदैहिकामुष्मिकसौख्यकामाः ॥
देवार्च्चनादानतपोव्रताद्यैर्धान्यं न लभ्यं कृषिमंतरेण ॥ ६३ ॥
खंडेलान्वयमंडनेंदुवदन त्वं पद्मसिंहाख्य भो
हेमाद्यैस्त्रिभिरंगजैर्गतिमितैर्भीमादिभिर्बंधुभिः ॥
भव्यांभोरुहखंडवासतरणेश्चारित्रचूडामणेः
सूरिश्रीजिनचंद्रकस्य वचनान्नंद्याश्चिरं भूतले ॥ ६४ ॥
शास्त्रं शस्त्रं पापवैरिक्षयेदः शास्त्रं नेत्रं त्वंतरार्थप्रदृष्टौ ॥
शास्त्रं पात्रं सर्वचंचद्गुणानां शास्त्रं तस्माद्यत्नतो रक्षणीयं ॥ ६५ ॥
श्रुत्वा शास्त्रं पापशत्रुं हिनस्ति श्रुत्वा शास्त्रं पुण्यमित्रं धिनोति ॥
श्रुत्वा शास्त्रं सद्विवेकं दधाति तस्माद्भव्यो यत्नतस्तद्धि पाति ॥ ६६ ॥
यावत्तिष्ठति भूतले सुरनदी रत्नाकरो भूधरः
कैलाशः किलचक्रिकारितजगद्वंद्यज्ञचैत्यालयः ॥
यावद्व्योम्नि शशांकवासरमणी प्रस्फोटयंतौ तम-
स्तावत्तिष्ठतु शास्त्रमेतदमलं संपठ्यमानं बुधैः ॥ ६७॥
सूरिश्रीजिनचंद्रांघ्रिस्मरणाधीनचेतसा
प्रशस्तिर्विहिता चासौ मीहाख्येन सुधीमता ॥ ६८ ॥

Digitized by Google

यद्यत्र काप्यवद्यं स्यादर्थे पाठे मयादृतं
तदा शोध्यं बुधैर्वाच्यमनंतः शब्दवारिधिः ॥ ६९ ॥
इतिश्रीभव्यकुमुदचंद्रस्य सूरेः श्रीजिनचंद्रस्य पादांभोरुहषट्ट-
देन पंडितश्रीमेधाविसंज्ञेन काव्यबंधेन विरचिता प्रशास्ता प्रशस्तिः
समाप्ता ॥ छ ॥

## No. 266.

## THE CHÂRITRASÂRA BY CHÂMUNDARÂJA.

**चारित्रसारः—चामुण्डमहाराजः.**

नं० चारित्रसारः

आ० अरिहननरजोहननरहस्यहरं पूजनार्हमर्हतं ।
सिद्धान् सिद्धाष्टगुणान् रत्नत्रयसाधकान् स्तुवे साधून् ॥ १ ॥

च० तत्वार्थराद्धान्तमहापुराणेष्वाचारशास्त्रेषु च विस्तरोक्तम् ।
आख्यत्समासादनुयोगवेदी चारित्रसारं रणरङ्गसिंहः ॥

इति सकलागमसंयमसंपन्नश्रीमज्जिनसेनभट्टारकश्रीपादपद्मप्रसादासादित-चतुरनुयोगपारावारपारगधर्मविजयिश्रीचामुण्डमहाराजविरचिते भावनासारसं-ग्रहे चारित्रसारे अनगारधर्मः समाप्तः

इति श्रीचारित्रसारः संपूर्णः

## No. 270.

## DHARMAŚARMÂBHYUDAYAKÂVYAM, BY HARICHANDRA.

**धर्मशर्माभ्युदयकाव्यम्—हरिचन्द्रः ।**

॥ ॐ नमः सिद्धेभ्यः ॥

श्रीनाभिसूनोश्चिरमंघ्रियुग्मनखेंदवः कौ मुदमेधयंतु ।
यत्रानमन्नाकिनरेंद्रचक्रचूडाश्मगर्भप्रतिबिंबमेणः ॥ १ ॥
चंद्रप्रभं नौमि यदीयभासा नूनं जिता चांद्रमसी प्रभा सा ।
नो चेत्कथं तर्हि तदंघ्रिलग्नं नखच्छलादिंदुकुटुंबमासीत् ॥ २ ॥
दुरक्षरक्षोदधियेत धात्र्यां मुहुर्मुहुर्घृष्टललाटपट्टाः ।
यं स्वर्गिणोनल्पगुणं प्रणेमुस्तनोतु नः शर्म्म स धर्म्मनाथः ॥ ३ ॥
संप्रत्यपायाः स्म इति प्रतीत्यै वह्वाविवाह्वाय मिथः प्रविष्टाः ।
यत्कायकांतौ कनकोज्ज्वलायां सुरा विरेजुस्तमुपैमि शांतिं ॥ ४ ॥
भूयादगाधः स विबोधवार्द्धिर्वीरस्य रत्नत्रयलब्धये वः ।
स्फुरत्पयोबुद्बुदबिंदुमुद्रामिदं यदंतस्त्रिजगत्तनोति ॥ ५ ॥

Digitized by Google

निर्मार्जिते यत्पदपंकजानां रजोभिरंतः प्रतिबिंबितानि ।
जनाः स्वचेतोमुकुरे जगंति पश्यंति तान्नौमि मुदे जिनेंद्रान् ॥ ६ ॥
रत्नत्रयं तज्जननार्त्तिमृत्युसर्प्पत्रयीदर्पहरं नमामि ।
यद्भूषणं प्राप्य भवंति शिष्टा मुक्तेर्विरूपाकृतयोप्यभीष्टाः ॥ ७ ॥
त्वद्भक्तिनम्रं जनमाश्रयावः साक्षादिति प्रष्टुमिवोपकर्ण्णे ।
चंद्राश्मताडंकपदात्पदार्थौ यस्याः स्थितौ ध्यायत भारतीं तां ॥ ८ ॥
जयंति ते केपि महाकवीनां स्वर्गप्रदेशा इव वाग्विलासाः ।
पीयूषनिस्यंदिषु येषु हर्षं केषां न धत्ते सुरसार्थलीला ॥ ९ ॥
लब्धात्मलाभा बहुधान्यवृद्ध्यै निर्मूलयंती घननीरसत्वं ।
सा मेघसंघातमपेतपंका शरत्सतां संसदपि क्षिणोतु ॥ १० ॥
वियत्पथप्रांतपरीक्षणाद्वा तदेतदंभोनिधिलंघनाद्वा ।
मात्राधिकं मंदधिया मयापि यद्वर्ण्यते जैनचरित्रमत्र ॥ ११ ॥
पुराणपारीणमुनींद्रवाग्भिर्यद्वा ममाप्यत्र गतिर्भवित्री ।
तुंगेपि सिद्ध्यत्यधिरोहिणीभिर्यद्वामनस्यापि मनोभिलाषः ॥ १२ ॥
श्रीधर्म्मनाथस्य ततः स्वशक्त्या किंचिच्चरित्रं तरलोपि वक्ष्ये ।
वक्तुं पुनः सम्यगिदं जिनस्य क्षमेत नो वागधिदेवतापि ॥ १३ ॥
अर्थे हृदिस्थेपि कविर्न कश्चिन्निर्ग्रंथिगीर्गुंफविचक्षणः स्यात् ।
जिह्वाबलस्पर्शमपास्य पातुं श्वा नान्यथांभो घनमप्यवैति ॥ १४ ॥
हृद्यार्थवंध्या पदबंधुरापि वाणी बुधानां न मनो धिनोति ।
न रोचते लोचनवल्लभापि स्नुहीक्षरत्क्षीरसरिन्नरेभ्यः ॥ १५ ॥
वाणी भवेत्कस्यचिदेव पुण्यैः शब्दार्थसंदर्भविशेषगर्भा ।
इंदुं विनान्यस्य न दृश्यते द्युत्तमोधुनाना च सुधाधुनी च ॥ १६ ॥
श्रव्येपि काव्ये रचिते विपश्चित्कश्चित्सचेताः परितोषमेति ।
उत्कोरकः स्यात्तिलकश्चलाक्ष्याः कटाक्षभावैरपरे न वृक्षाः ॥ १७ ॥
परस्य तुच्छेपि परोनुरागो महत्यपि स्वस्य गुणे न तोषः ।
एवंविधो यस्य मनोविवेकः किं प्रार्थ्यते सोत्र हिताय साधुः ॥ १८ ॥
साधोर्विनिर्म्माणविधौ विधातुश्च्युताः कथंचित्परमाणवो ये ।
मन्ये कृतास्तैरुपकारिणोन्ये पाथोदचंद्रद्रुमचंदनाद्याः ॥ १९ ॥
पराङ्मुखोप्येष परोपकारव्यापारभारक्षमएव साधुः ।
किं दत्तपृष्टोपि गरिष्टधात्रीप्रोद्धारकर्म्मप्रवणो न कूर्म्मः ॥ २० ॥
निसर्गशुद्धस्य सतो न कश्चिच्चेतोविकाराय भवत्युपाधिः ।
व्यक्तस्वभावोपि विवर्णयोगात्कथं तदस्य स्फटिकोस्तु तुल्यः ॥ २१ ॥
खलं विधात्रा सृजता प्रयत्नात्किं सज्जनस्योपकृतं न तेन ।

Digitized by Google

ऋते तमांसि द्युमणिर्मणिर्वा विना न काचैः स्वगुणं व्यनक्ति ॥ २२ ।
दोषानुरक्तस्य खलस्य कस्याप्युलूकपोतस्य च को विशेषः ।
अह्नीव सत्कांतिमति प्रबंधे मलीमसं केवलमीक्षते यः ॥ २३ ॥
न प्रेम नम्रेपि जने विधत्से मित्रेपि मैत्रीं खल नातनोषि ।
तदेष किं नेष्यति न प्रदोषस्त्वामंजसा सायमिवावसानं ॥ २४ ॥
श्रव्यं भवेत्काव्यमदूषणं यन्न निर्गुणं क्वापि कदापि मन्ये ।
गुणार्थिनो दूषणमाददानस्तत्सज्जनाद्दुर्जन एव साधुः ॥ २५ ॥
अहो खलस्यापि महोपयोगः स्नेहद्रुहो यत्परिशीलनेन ।
आकर्ण्णमापूरितपात्रमेताः क्षीरं क्षरंत्यक्षतमेव गावः ॥ २६ ॥
आः कोमलालापपरेपि मागाः प्रमादमंतःकठिने खलेस्मिन् ।
सेवालशालिन्युपले छलेन पातो भवेत्केवलदुःखहेतुः ॥ २७ ॥
आदाय शब्दार्थमलीमसानि यद्दुर्ज्जनोसौ वदने दधाति ।
तेनैव तस्याननमेव कृष्णं सतां प्रबंधः पुनरुज्ज्वलोभूत् ॥ २८ ॥
गुणानधस्तान्नयतोप्यसाधुपद्मस्य यावद्दिनमस्तु लक्ष्मीः ।
दिनावसाने तु भवेद्धृतश्रीराज्ञः सभासन्निधिमुद्रितास्यः २९ ॥
उच्चासनस्थोपि सतां न किंचिन्नीचः स चित्तेषु चमत्करोति ।
स्वर्ण्णाद्रिशृंगाग्रमधिष्ठितोपि काको वराकः खलु काक एव ॥ ३० ॥
वृत्तिर्मरुद्दीपवतीव साधोः खलस्य वैवस्वतसोदरीव ।
तयोः प्रयोगे कृतमज्जनो नः प्रबंधबंधुर्लभतां विशुद्धिं ॥ ३१ ॥
अथास्ति जंबूपपदः पृथिव्यां द्वीपः प्रभान्यक्कृतनाकिलोकः ।
यो वृद्धया मध्यगतोपि लक्ष्म्या द्वीपांतराणामुपरीव तस्थौ ॥ ३२ ॥
क्षेत्रच्छदैः पूर्वविदेहमुख्यैरधः स्थितस्फारफणींद्रदंडः ।
चकास्ति रुक्माचलकर्ण्णिको यः सद्म श्रियः पद्म इवाब्धिमध्ये ॥ ३३ ॥
द्वीपेषु यः कोपि करोति गर्वं मयि स्थितेप्यस्तु स मे पुरस्तात् ।
इतीव येन ग्रहकंकणांको हस्तोभ्युदस्तास्त्रिदशाद्रिदंभात् ॥ ३४ ॥
पश्यंतु संसारतमस्यपारे संतश्चतुर्वर्ग्गफलानि सर्व्वे ।
इतीव यो द्विद्विदिवाकरेंदुव्याजेन धत्ते चतुरः प्रदीपान् ॥ ३५ ॥
अवाप्य सर्प्पाधिपमौलिमैत्रीं छत्रद्युतिं तन्वति यत्र वृत्ते ।
धत्ते समुत्तेजितशातकुंभकुंभप्रभां कांचन कांचनाद्रिः ॥ ३६ ॥
सम्यक्त्वपाथेयमवाप्यते चेदृजुस्तदस्मादपवर्ग्गमार्ग्गः ॥
इतीव लोके निगदत्युदस्तशैलेंद्रहस्तांगुलिसंज्ञया यः ॥ ३७ ॥
पातुं बहिर्मारुतमंकसुप्तलक्ष्मीलसत्कुंकुमपंकपीतः ।
तदंतरुद्भिद्य महीमहीनामभ्युत्थितो नाथ इवास्ति मेरुः ॥ ३८ ॥

Digitized by Google

चकास्ति पर्य्यंतपतत्पतंगे यत्रांबरं दीप इवोपरिष्टात् ।
कयापि शृंगाग्रघनांजनानां जिघृक्षया पात्रमिव प्रदत्तं ॥ ३९ ॥
द्यावापृथिव्योः पृथुरंतरे यः कृतस्थितिः स्थूलरथांगकांत्योः ।
युगानुकारिध्रुवमंडलश्रीरूर्द्धो रथस्याक्ष इवावभाति ॥ ४० ॥
तद्दक्षिणं भारतमस्ति तस्य क्षेत्रं जिनेंद्रागमवारिसेकात् ।
स्वर्गादिसंपत्फलशालि यत्र निष्पद्यते पुण्यविशेषसस्यं ॥ ४१ ॥
यत्सिंधुगंगांतरवर्त्तिनोच्चैः शैलेन भिन्नं विजयार्द्धनाम्ना ।
भारेण लक्ष्म्या इव दुर्वहेण बभूव षट्खंडमखंडशोभं ॥ ४२ ॥
तत्रार्यखंडं त्रिदिवात्कथंचिच्च्युतं निरालंबतयेव खंडं ।
ललामवन्मंडयति स्वकांत्या देशो महानुत्तरकोशलाख्यः ॥ ४३ ॥
अनेकपद्माप्सरसः समंताद्यस्मिन्नसंख्यातहिरण्यगर्भाः ।
अनंतपीतांबरधामरम्या ग्रामा जयंति त्रिदिवप्रदेशान् ॥ ४४ ॥
यंत्रप्रणालीचषकैरजस्रमापीय पुंड्रेक्षुरसासवौघं ।
मंदानिलांदोलितशालिपूर्णा विघूर्णते यत्र मदादिवोर्वी ॥ ४५ ॥
विस्तार्य्य तारा रभसान्निशि द्यौः पुनः पुनर्यद्दिवसे प्रमार्ष्टि ।
उत्पुंडरीकैः किल यत्सरोभिः स्वं लब्धसाम्यं तदमन्यमाना ॥ ४६ ॥
उत्पालिकाभ्रूस्तिमितैस्तडागचक्षुःसहस्रैरिव विस्मयाय ।
यद्वैभवं भूरपि वीक्ष्य धत्ते रोमांचमुद्यत्कलमच्छलेन ॥ ४७ ॥
जनैः प्रतिग्रामसमीपमुच्चैः कृतावृषाढ्यैर्वरधान्यकूटाः ।
यत्रोदयास्ताचलमध्यगस्य विश्रामशैला इव भांति भानोः ॥ ४८ ॥
नीरांतरात्तप्रतिमावतारास्तरंगिणीनां तरवस्तटेषु ।
विभांति यत्रोर्ध्वगतार्कतापात्कृतप्रयत्ना इव मज्जनाय ॥ ४९ ॥
सस्यस्थलीपालकबालिकानामुल्लोलगीतश्रुतिनिश्चलांगं ।
यत्रैणयूथं पथि पांथसार्थाः सलेप्यलीलामयमातनोति ॥ ५० ॥
आस्कंधमृज्वी तदनल्पपत्रप्रसूनशाखावलया द्रुमाली ।
मयूरपत्रग्रथितातपत्रश्रीर्यस्य देशाधिपतित्वमाह ॥ ५१ ॥
यत्रालिमाला स्थलपंकजानां सौरभ्यलोभादभितो भ्रमंती ।
विभाति लोलाध्वगलोचनानां बंधाय सिद्धायसशृंखलेव ॥ ५२ ॥
यं तादृशं देशमपास्य रम्यं यत्क्षारमब्धिं सरितः समीयुः ।
बभूव तेनैव जलाशयानां तासां प्रसिद्धं किल निम्नगात्वं ॥ ५३ ॥
भूकंठलोठन्नवपुंडरीकस्रग्बंधुरा गोधनधोरणी या ।
सा यस्य दिग्मंडलमंडनाय विस्तारिणी कीर्त्तिरिवावभाति ॥ ५४ ॥
कल्पद्रुमान् कल्पितदानशीलान् जेतुं किलोत्तालपतत्त्रिनादैः ।

आहूय दूरादितरंति वृक्षाः फलान्यचिंत्यानि जनाय यत्र ॥ ५५ ॥
इति देशवर्णनम् ॥
तत्रास्ति तद्रत्नपुरं पुरं यद्द्वारस्थलीतोरणवेदिमध्यं ।
अलंकरोत्यर्कतुरंगपंक्तिः कदाचिदिंदीवरमालिकेव ॥ ५६ ॥
मुक्तामया एव जनाः समस्तास्तास्ताः स्त्रियो या नवपुष्परागाः ।
वज्रं द्विषां मूर्द्ध्नि नृपोपि यस्य वितन्वते नाम विनिश्चितार्थं ॥ ५७ ॥
भोगींद्रवेश्मेदमिति प्रसिद्धया यद्वप्रवेषः किल पाति शेषः ।
तथाहि दीर्घातिकदीर्धिकास्य निर्मुक्तनिर्मोकनिभा विभाति ॥ ५८ ॥
समेत्य यस्मिन्मणिबद्धभूमौ पौरांगनानां प्रतिबिंबदंभात् ।
मन्ये न रूपामृतलोलुपाक्ष्यः पातालकन्याः सविधं त्यजंति ॥ ५९ ॥
प्रासादशृंगेषु निजप्रियार्त्त्यो हेमांडकप्रांतमुपेत्य रात्रौ ।
कुर्वंति यत्रापरहेमकुंभभ्रमं द्युगंगाजलचक्रवाकाः ॥ ६० ॥
शुभ्रायदभ्रंलिहमंदिराणां लग्ना ध्वजाग्रेषु न ताः पताकाः ।
किं तु त्वचो घट्टनतः सितांशोर्नो चेत्किमंतर्व्रणकालिकास्य ॥ ६१ ॥
कृताप्यधो भोगिपुरी कुतोभूदहीनभूषेत्यतिकोपकंपं ।
यज्जेतुमेतामिव खातिकांभश्छायाच्छलात्क्रामति नागलोकं ॥ ६२ ॥
संक्रांतबिंबः स्रवदिंदुकांते नृपालये प्राहरिकैः परीते ।
हृताननश्रीः सुदृशां चकास्ति काराधृतो यत्र रुदन्निवेंदुः ॥ ६३ ॥
विभाति रात्रौ मणिकुट्टिमोर्व्वी संजाततारप्रतिमावतारा ।
दिदृक्षया यत्र विचित्रभूतेरुत्तानिवाक्षीव कुतूहलेन ॥ ६४ ॥
दृग्भिर्निमेषा द्युसदां पतंती दोषाय माभूदिति यस्य राज्या ।
उत्तार्य्यते मूर्द्ध्नि जितामरस्य नीराजनापात्रमिवेंदुबिंबं ॥ ६५ ॥
दंदह्यमानागुरुधूमवर्त्तिप्रवर्त्तिते व्योम्नि घनांधकारे ।
सौधेषु यत्रोर्द्धनिविष्टहेमकुंभप्रभा भाति तडिल्लतेव ॥ ६६ ॥
यत्रोच्चकैश्चैत्यनिकेतनानां कूटस्थलीकृत्रिमकेसरिभ्यः ।
रात्रिंदिवं भीत इवांतरिक्षे भ्राम्यत्युपात्तैकमृगो मृगांकः ॥ ६७ ॥
यत्रोच्चहर्म्येषु पतत्सपद्मव्योमापगापूरसहस्रशंकां ।
वितन्वते कांचनकुंभशोभासंभाव्यमानाः सितवैजयंत्यः ॥ ६८ ॥
यत्राश्मगर्भोज्ज्वलवेश्मभित्तिप्रभाभिराक्रांतनभस्तलाभिः ।
दिवापि वापीपुलिने वराकी रात्रिभ्रमात्ताम्यति चक्रवाकी ॥ ६९ ॥
मरुच्चलत्केतुकरांगुलीभिः संतर्जितानीव सिषेविरे यत् ।
अतुच्छशाखानगरच्छलेन चतुर्दिगंताधिपपत्तनानि ॥ ७० ॥
रत्नांडकैः शुभ्रसहस्रकूटान्याभांति यस्मिन् जिनमंदिराणि ।

तद्दृष्टुमुर्वीतलनिर्गताहिभर्त्रा कृतानीव वपूंषि हर्षात् ॥ ७१ ॥
उदेति पातालतलात्सुधायाः सिरासहस्रं सरसीषु यत्र ।
मन्ये ततस्तासु रसाधिकत्वं मुंचत्युपांतं न च भोगिवर्गः ॥ ७२ ॥
मंथाचलामूलविलोडितांतर्लब्धैकसत्कौस्तुभदृष्टसारः ।
रत्नाकरः स्याज्जलधिः कुतस्तत्सेवेत नैतत्परिखामिषाच्चेत् ॥ ७३ ॥
अतीव भास्तंभितकौस्तुभानां स्तूपान्निरूप्य ज्वलतां मणीनाम् ।
आक्रीडशैलानिव यत्र लक्ष्म्याः मत्येति दूरापणिकोपि लोकः ॥ ७४ ॥
पदे पदे यत्र परार्थनिष्ठा रसस्थितिं कामपि नाटयंत्यः ।
वाचः कवीनामिव कस्य नोच्चैश्चेतोमुदं कंदलयंति वेश्याः ॥ ७५ ॥
संगीतकारंभरसन्मृदंगाः कैलासभासो वलभीनिवेशाः ।
वृंदानि यत्र ध्वनदंबुदानामनंबुशुभ्राणि विडंबयंति ॥ ७६ ॥
रणद्झणत्किंकिणिकारवेण संभाष्य यत्रांबरमार्गखिन्नं ।
मरुच्चलत्केतनतालवृंतैर्हर्म्यावली वीजयतीव मित्रं ॥ ७७ ॥
हारावलीनिर्झरहारितुंगमवाप्य कांतास्तनशैलदुर्गं ।
यत्र त्रिनेत्रादपि निर्विशंकः शंके स्मरो भूत्रयदुर्द्धरोभूत् ॥ ७८ ॥
केशेषु भंगस्तरलत्वमक्ष्णोः सरागता केवलमोष्ठयोश्च ।
मुक्त्वा तदास्यं सुदृशां न यत्र दोषाकरच्छायमवैमि किंचित् ॥ ७९ ॥
रात्रौ तमःपीतसितेतराश्मवेश्माग्रभाजामसितांशुकानां ।
स्त्रीणां मुखैर्यत्र नवोदितेंदुमालाकुलेव क्रियते नभश्रीः ॥ ८० ॥
महाजिनो नोर्द्धधुरा रथेन प्राकारमारोदुममुं क्षमंते ।
इतीव यल्लंघयितुं दिनेशः श्रयत्प्रतीचीमथवाप्युदीचीं ॥ ८१ ॥
नीलाश्मलीलावलभीषु जालव्यालंबमानैर्निशि चंद्रपादैः ।
प्रतारिता यत्र न मुग्धवध्वो हारावचूलेष्वपि विश्वसंति ॥ ८२ ॥
उपर्युपारूढवधूमुखेंदूनुदीक्ष्य मंदाक्षमुपैति नूनं ।
यत्रोच्चसौधोच्चयचूलिकाभ्यो नम्रीभवन्निंदुरतः प्रयाति ॥ ८३ ॥
प्रालेयशैलेंद्रविशालशालश्रोणीसमालंबितवारिवाहं ।
विराजते निर्जरराजधानीमुड्डीय यज्जेतुमिवात्तपक्षं ॥ ८४ ॥

अगुरुरिति सुगंधिद्रव्यभेदे प्रसिद्धिः
सततमविभवोपि प्रेक्ष्यते मेष एव ।
फलसमयविरुद्धा यत्र वृक्षानपास्य
क्वचिदपि न कदाचित्केनचित्कोपि दृष्टाः ॥ ८५ ॥

अंतःस्थितप्रथितराजविराजमानो यः प्रांतभूवलयिता पृथुशालबंधः ।
प्रत्यर्थिनाशपिशुनः परिपूर्णमूर्त्तेरिंदोरुदारपरिवेष इवावभाति ॥ ८६ ॥

इति महाकविश्रीहरिचंद्रविरचिते श्रीधर्म्मशर्म्माभ्युदयमहाकाव्ये
नगरवर्ण्णनो नाम प्रथमः सर्ग्गः ॥

च० अभजदथ विचित्रैर्वीक्ष्यसूनोपचारैः
प्रभुरिह हरिचंद्राराधितो मोक्षलक्ष्मीं ।
तदनु तदनुयायी प्राप पर्यंतपूजो-
पचितसुकृतराशिः स्वं पदं नाकिलोकः ॥ ८९ ॥

इति महाकविश्रीहरिचन्द्रविरचिते श्रीधर्मशर्माभ्युदये महाकाव्ये श्रीधर्मनाथनिर्वाणगमनो नाम एकविंशतितमः सर्गः ।

संवत् १५६४ वर्षे श्रावणशुदि ५ बुधवासरे
श्रीमान्सरस्वतीगच्छो मूलसङ्घे महोत्तमः ।
बलात्कारगणोपेता यत्र भान्ति यतीश्वराः ॥
आम्नायो यत्र संभूतः कुन्दकुन्दगणेशिनः ।
तत्रासीच्छुद्धबोधात्मा पद्मनन्दिगणाधिपः ॥
..................................

## No. 274.

## FROM THE FIRST ÂŚVÂSA OF THE YAŚASTILAKA-KÂVYAM BY SOMADEVA.

### यशस्तिलककाव्यम्—सोमदेवः.

आ० ॥ ॐ नमः सिद्धेभ्यः ॥

श्रियं कुवलयानंदप्रसादितमहोदयः ।
देवश्चंद्रप्रभः पुष्याज्जगन्मानसवासिनीं ॥ १ ॥
श्रियं दिश्यात्स वः श्रीमान्यस्य संदर्शनादपि ।
भवेत्त्रैलोक्यलक्ष्मीणां जंतुः कंतुनिकेतनं ॥ २ ॥
श्रियं देयात्स वः कामं यस्योन्मीलति केवले ।
त्रैलोक्यमुत्सवोदारं पुरमेकमिवाभवत् ॥ ३ ॥
यस्यांघ्रिनखनक्षत्रविजृंभाय नभस्यते ।
नमज्जगत्त्रयीपालकुंतलाभोगडंबरः ॥ ४ ॥
बालारुणायते यस्य पादद्वितयमंडलं ।
प्रह्वत्रिविष्टपाधीशकिरीटोदयकोटिषु ॥ ५ ॥

Digitized by Google

नखोज्जृंभकराभोगकेसरं यत्क्रमद्वयं ।
नम्रामरवधूनेत्रदीर्घिकास्वंबुजायते ॥ ६ ॥
यत्पदस्मृतिसंभाराद्भुवनत्रयनायकाः ।
वाङ्मनोदैवसिद्धीनां सिद्धादेशादिवेशते ॥ ७ ॥
तस्मै सत्कीर्तिपूर्णाय विश्वदृश्यैकमूर्त्तये ।
नमः शमसमुद्राय जिनेन्द्राय पुनः पुनः ॥ ८ ॥

अपि च

भूर्भुवः स्वस्त्रयं यत्र वेलाचलकुलायते ।
अपाराय नमस्तस्मै जिनबोधपयोधये ॥ ९ ॥

किं च ॥

मतेः सूते बीजं सृजति मनसश्चक्षुरपरं
यदाश्रित्यात्मायं भवति निखिलज्ञेयविषयः ।
विवर्त्तैरत्यंतैर्भरितभुवनाभोगविभवैः
स्फुरत्तत्त्वं ज्योतिस्तदिह जयतादक्षरमयं ॥ १० ॥
सर्वज्ञकल्पैः कविभिः पुरातनैरवीक्षितं वस्तु किमस्ति संप्रति ।
ऐदंयुगीनस्तु कुशाग्रधीरपि प्रवक्ति यत्तत्सदृशं स विस्मयः ॥ ११ ॥
कृतीः परेषामविलोकमानस्तदुक्तिवक्तापि कविर्न हीनः ।
कृतेक्षणो राजपथेन सम्यक्प्रयाति च प्रत्युत विस्मयाय ॥ १२ ॥
कृत्वा कृतीः पूर्वकृताः पुरस्तात्प्रत्यादरं ताः पुनरीक्षमाणः ।
तथैव जल्पेदथ योन्यथा वा स काव्यचोरोस्तु स पातकी च ॥ १३ ॥
असहायमनादर्शं रत्नं रत्नाकरादिव ।
मत्तः काव्यमिदं जातं सतां हृदयमंडनं ॥ १४ ॥
उक्तयः कविताकांताः सूक्तयोवसरोचिताः ।
युक्तयः सर्वशास्त्रांतास्तस्य यस्यात्र कौतुकं ॥ १५ ॥
किंचित्काव्यं श्रवणसुभगं वर्ण्णनोदीर्ण्णवर्ण्णं
किंचिद्वाच्योचितपरिचयं हृच्चमत्कारकारि ।
अत्रासूयेत्क इह सुकृती किंतु युक्तं तदुक्तं
यद्व्युत्पत्त्यै सकलविषये स्वस्य चान्यस्य च स्यात् ॥ १६ ॥
आजन्म समभ्यस्ताच्छुष्कात्तर्कात्तृणादिव ममास्याः ।
मतिसुरभेरभवदिदं सूक्तिपयः सुकृतिनां पुण्यैः ॥ १७ ॥
वाच एव विशिष्टानामनन्यसमवृत्तयः ।
स्वस्यातिशायिनं हेतुमाहुः कांता लता इव ॥ १८ ॥
वागर्थः कविसामर्थ्यं त्रयं तत्र द्वयं समं ।

Digitized by Google

सर्वेषामेव वक्तॄणां तृतीयं भिन्नशक्तिकं ॥ १९ ॥
लोको युक्तिः कलाश्छंदोलंकाराः समयागमाः ।
सर्वसाधारणाः सद्भिस्तीर्थमार्गा इव स्मृताः ॥ २० ॥
अर्थो नाभिमतं शब्दं न शब्दोर्थं विगाहते ।
स्त्रीवृंदमिव मंदस्य दुनोति कविता मनः ॥ २१ ॥
दुर्ज्जनानां विनोदाय बुधानां मतिजन्मने ।
मध्यस्थानां न मौनाय मन्ये काव्यमिदं भवेत् ॥ २२ ॥
सुकविकथामाधुर्यप्रबंधसेवातिवृद्धजाड्यानां ।
पिचुमंदकंदलीष्विव भवतु रुचिर्मद्विधोक्तिषु बुधानां ॥ २३ ॥
न गद्यं पद्यमिति वा सतां कुर्वीत गौरवं ।
किंतु किंचित्स्वसंवेद्यमन्यत्सुखमिव स्त्रियाः ॥ २४ ॥
त एव कवयो लोके येषां वचनगोचरः ।
सपूर्व्वोपूर्वतामर्थो यात्यपूर्वः सपूर्वतां ॥ २५ ॥
ता एव सुकवेर्वाचस्तिरश्चामपि याः श्रुताः ।
भवंत्यानंदनिष्पंदामंदरोमांचहेतवः ॥ २६ ॥
नचैकांतेन वक्रोक्तिः स्वभावाख्यानमेव वा ।
बुधानां प्रीतये किंतु द्वयं कांताजनेष्विव ॥ २७ ॥
अबुधेप्युक्तियुक्तिज्ञे कवीनामुत्सवो महान् ।
गुणाः किं न सुवर्णस्य व्यज्यंते निकषोपले ॥ २८ ॥
अवक्तापि स्वयं लोकः कामं काव्यपरीक्षकः ।
रसपाकानभिज्ञोपि भोक्ता वेत्ति न किं रसं ॥ २९ ॥
वृथा वक्तुः श्रमः सर्वो निर्विचारे नरेश्वरे ।
प्राज्यभोज्यविधिः कः स्यात्तृणस्वादिनि देहिनि ॥ ३० ॥
यः पार्थिवत्वसामान्यान्माणिक्याश्मसमागमः ।
पार्थिवः पार्थिवो नूनं वृथा तत्र कवेः श्रमः ॥ ३१ ॥
अंगनावद् गिरोगण्याः प्रायेणान्यपरिग्रहात् ।
स्वयं विचारशून्यो हि प्रसिद्धया रज्यते जनः ॥ ३२ ॥
यः स्वयं कवते नैव यश्चैको मूढधीश्वरः ।
मरणादपि दुःखाय काव्यकीर्त्तिस्तयोः पुरः ॥ ३३ ॥
अंतःसारं भवेद्रत्नं बहिः काचं च सुंदरं ।
यथा तथा कवेः काव्यमकवेश्च विभाव्यतां ॥ ३४ ॥
निःसारस्य पदार्थस्य प्रायेणाडंबरो महान् ।
नहि स्वर्णे ध्वनिस्तादृक्कांस्ये यादृक्प्रजायते ॥ ३५ ॥

Digitized by Google

काव्यकथासु त एव हि कर्त्तव्याः साक्षिणः समुद्रसमाः ।
गुणमणिमंतर्न्निदधति दोषमलं ये बहिश्च कुर्वंति ॥ ३६ ॥
आत्मास्थितेर्वस्तु विचारणीयं न जातु जात्यंतरसंश्रयेण ।
दुर्वर्णनिर्वर्णविधौ बुधानां सुवर्णवर्णस्य मुधानुबंधः ॥ ३७ ॥
गुणेषु ये दोषमनीषयांधा दोषान् गुणीकर्तुमथेशते वा ।
श्रोतुं कवीनां वचनं न तेर्हाः सरस्वतीद्रोहिषु कोधिकारः ॥ ३८ ॥
अयं कविर्नैष कविः किमत्र हेतुप्रयुक्तिः कृतिभिर्विधेया ।
श्रोत्रं मनश्चात्र यतः समर्थं वागर्थयोरूपनिरूपणाय ॥ ३९ ॥
कवितायै नमस्तस्यै यद्रसोल्लासिताशयाः ।
कुर्वंति कवयः कीर्त्तिलतां लोकांतसंश्रयां ॥ ४० ॥
निद्रां विदूरयसि शास्त्ररसं रुणत्सि सर्वेंद्रियार्थमसमर्थविधिं विधत्से ।
चेतश्च विभ्रमयसे कविते पिशाचि लोकस्तथापि सुकृती त्वदनुग्रहेण ॥ ४१ ॥

No. 274—(*continued*).

## THE FIRST KALPA OF THE UPÂSAKÂDHYÂYANANAM IN SOMADEVA'S YAŚASTILAKAM.

॥ श्रीमानत्रान्तरे सूरिः सुदत्तोवधिबोधतः ।
बुध्वा तदागमं तत्र ययौ संयमधीः स्वयं ॥
तत्रागमान्मुनेर्मान्यात्सभा चुक्षोभ भूभुजः ।
रत्नाकरस्य वेलेव पार्व्वणेंदुसमागमात् ॥
विधाय विधिवत्सूरेः सपर्यां तत्र भूपतौ ।
आसीने सत्युवाचेदमसौ मुनिकुमारकः ॥

भगवन्नस्ति खलु कंदलांतरालखेलल्लेलिहानेशानकपर्द्दचंदनद्रुमालवालायमानमंदाकिनीजलकेलिकलहंसेन । सुरसुंदरीलोचनचकोरकुलसंतर्प्पणार्पितामृतासारसृष्टिना । सरस्वतीश्रवणतीर्थोपासनतापसेन । मनोजविजयार्ज्जनावर्ज्जितजन्मना रतिवल्लरीकुसुमस्तबकसुंदरेण । त्रिदिवदीर्घिकार्जुनांबुजकुंजविजयिमूर्त्तिना । कौस्तुभैरावतपारिजातामृतेंदिरासोदरेण । मृगमदकर्द्दमालिखितललामलिपिविलोपिना विदलच्छदातुच्छतापिच्छगुलुच्छाविच्छिन्नच्छायाछुप्पलांछनेनालंकृतिमता क्षीरोदनंदनेन चंद्रमसा मुद्रितः प्रतिपर्व्व संपन्नफलपरंपरोप्युदितोदितविभूतिरहितकीर्तिस्तंभनिर्भेदभि[प]दूनां यदूनां वंशः ।

तत्राभवन्निखिललोकार्चितामणीयमानचरणो रणोत्सवतारासिकसपत्नांगनालोचनचंद्रकांतमणिप्रणालजलप्रवाहिनीहाराकिरणोदयो दयोचिताचरणानंदितविनीता-

Digitized by Google

वनीपालदारको । दाराकोग्रतरकरबालविनिर्भिन्नारीभकुंभस्थलोच्छलन्मुक्ताफलनिकरतारकितगगनतलो । नतलोकपालचूडामणिमरीचिवलयालवालविलसत्क्रमाशोकपल्लवश्री : । श्रीविरामसीमाश्रितशत्रुसंतानतरूत्पाटनपटुदोर्दंडमंडलप्रचंडश्चंडमहासेनो नाम नरपतिस्तस्यायं समस्तसाम्राज्यधुरोद्धारधौरेयः। प्रजोपद्रवद्रुतक्षुद्रकाद्रवेयवैनतेयः साक्षात् कुसुमधनुः सूनुरावयोश्च सवित्र्याः सकलजगद्व्यवहारप्रवृत्तिदत्तस्कंधात् संसारसंबंधादनुजपर्ययः सोदर्यः स एष संप्रतिस्वभावतो मृदुमानसरसप्रसरोपि दुरुपदेशावसरः । ताम्रपर्णीपयःप्रवाह इव संजातशुक्तिसंपुटकोटरावगाहः कठिनतानीतमतिरस्मत्समागतिशलाकासादितसूत्रप्रवेशमार्गो निकामं संपद्यमानधर्म्मसंसर्गो भवितुमिच्छतीति ।

तदनु राजा । सबहुमानं धर्म्मद्रुमप्रथमोत्पन्नपल्लवायमानेन । सकलसंसारव्यसनवनदावानलप्रभापटलकांतिना । नखमयूखप्रसरोत्सर्प्पितश्रवणसमीपसरस्वतीप्रवाहेण सीमंतप्रांतसरःसंजातजलजकुड्मलविडंबिना करयुगलेनोत्तंसितशिखंडः प्रणम्यानाकुलमनाः प्रत्याक्षिप्तव्याक्षेपैनाः परलोकोपायपरामर्शपवित्रप्रकृतिः । शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्वाभिनिवेशपेशलमतिः सुदत्तभगवंतमभयरुचिविरचितावसरोदंतमेवं किलाभाषत भगवन् धर्म्मात् किलैष जंतुर्भवति सुखी जगति स च पुनर्द्धर्म्मः किं रूपः किं भेदः किमुपायः किं फलश्च जायेत ॥

भगवानाह ॥ राजन् समाकर्णय ॥

यस्मादभ्युदयः पुंसां निःश्रेयसफलाश्रयः ।
वदंति विदिताम्नायास्तं धर्म्मं धर्म्मसूरयः ॥
स प्रवृत्तिनिवृत्त्यात्मा गृहस्थेतरगोचरः ।
प्रवृत्तिर्मुक्तिहेतौ स्यान्निवृत्तिर्भवकारणात् ॥

राजाह ॥ किं पुनर्भगवन् मुक्तेः कारणं किं च संसारस्य को वा गृहाश्रमिणां धर्म्मः कश्च संयमिलोकस्य । भगवान् ।

सम्यक्त्वज्ञानचारित्रत्रयं मोक्षस्य कारणं ।
संसारस्य च मीमांस्यं मिथ्यात्वादि चतुष्टयं ॥
सम्यक्त्वं भावनामाहुर्युक्तियुक्तेषु वस्तुषु ।
मोहसंदेहविभ्रांतिवर्ज्जितं ज्ञानमुच्यते ॥
कर्म्मादाननिमित्तायाः क्रियायाः परमं शमं ।
चारित्रोचितचातुर्याश्चारुचारित्रमूचिरे ॥
सम्यक्त्वज्ञानचारित्रविपर्ययपरं मनः ।
मिथ्यात्वं नृषु भाषंते सूरयः सर्ववेदिनः ॥

अत्र दुरागमवासनाविलासिनीवासितचेतसां प्रवर्त्तितप्राकृतलोकानोकहोन्मूल-

Digitized by Google

नसमयस्रोतसां । सदाचाराचरणचातुरीविदूरवर्त्तिनां परवादिनां मुक्तेरुपाये काये च बहुवृत्तयः खलु प्रवृत्तयः ॥ तथाहि ॥

सकलनिष्कलाप्तमाप्तमंत्रतंत्रापेक्षदीक्षालक्षणात् । श्रद्धामात्रानुसरणात् । मोक्ष इति सैद्धांतवैशेषिकाः । द्रव्यगुणकर्म्मसामान्यसमवायांत्यविशेषाभावाभिधानानां पदार्थानां साधर्म्यवैधर्म्यबोधतंत्रात् ज्ञानमात्रादिति तार्क्किकवैशेषिकाः । त्रिकाल-भस्मोद्धूलनेञ्जागडुक (गंतुक) प्रदानाप्रदक्षिणीकरणात्मविडंबनादिक्रियाकांडमात्रा धिष्ठानादनुष्ठानादितिपाशुपताः सर्व्वेषु पेयापेयभक्ष्याभक्ष्यादिषु निःशंकचित्ता-द्वृत्तादिति कुलाचार्यकाः ॥ तथा च त्रिकमतोक्तिर्मदिरामोदमेदुरवदनस्तरसर-सप्रसन्नहृदयः सव्यपार्श्वविनिवेशितशक्तिः सक्ति[शक्ति]मुद्रासनधरः स्वयमु-मामहेश्वरायमाणः कृष्णया शर्वाणीश्वरमाराधयेदिति । प्रकृतिपुरुषयोर्विवेकमतेः ख्यातेरिति सांख्याः ॥

नैरात्म्यादिनिवेदितसंभावनातो भावनातइति दशवलशिष्याः ॥

अंगारांजनादिवत् स्वभावदेवकालुष्योत्कर्षप्रवृत्तस्य चित्तस्य न कुतश्चिद्विशुद्ध-वृत्तिरिति जैमिनीयाः । सति धर्म्मिणि धर्म्माश्चित्यंते ततः परलोकिनोभा-वात्परलोकाभावे कस्यासौ मोक्ष इति समवाप्तसमस्तनास्तिकाधिकाधिप-त्या वार्हस्पत्याः । परमब्रह्मदर्शनवशादशेषभेदसंवेदनाविद्याविनाशादिति वेदांत-वादिनः । नैवांतस्तत्वमस्तीह न बहिस्तत्वमंजसा । विचारगोचरातीते शून्य-ताश्रेयसी तत इति पश्यतोहराः प्रकाशितशून्यतैकांततिमिराः शाक्यविशेषाः । तथा ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मसंस्काराणां नवसंख्यावसराणामात्मगु-णानामत्यंतोन्मुक्तिर्मुक्तिरिति काणादाः तदुक्तं ॥

बहिः शरीराद्यद्रूपमात्मनः संप्रतीयते ।
उक्तं तदेव मुक्तस्य मुनिना कणभोजिना ॥

निराश्रयचित्तोत्पत्तिलक्षणो मोक्ष इति ताथागताः ॥

तदुक्तं ॥

दिशं न कांचिद्विदिशं न कांचिन्नैवावनिं गच्छति नांतरिक्षं ।
दीपो यथानिर्वृतिमभ्युपेतः स्नेहक्षयात् केवलमेति शांतिं ॥
दिशं न कांचिद्विदिशं न कांचिन्नैवावनिं गच्छति नांतरिक्षं ।
जीवस्तथा निर्वृतिमभ्युपेतः क्लेशक्षयात् केवलमेति शांतिं ॥

बुद्धिमनोहंकारविरहादखिलेंद्रियोपशमावहात्तदा द्रष्टुः स्वरूपेवस्थानं मुक्ति-रिति कापिलाः ॥ यथा घटविघटने घटाकाशमाकाशीभवति तथा देहोच्छे-दात्सर्व्वः प्राणी परे ब्रह्मणि लीयत इति ब्रह्माद्वैतवादिनः ॥

अज्ञातपरमार्थानामेवमन्येपि दुर्णयाः ।
मिथ्यादृशां न गण्यंते जात्यंधानामिव द्विपे ।

Digitized by Google

स्वगतं ।

प्रायः संप्रति कोपाय सन्मार्गस्योपदेशनं ।
निर्लूननासिकस्येव विशुद्धादर्श[दर्शनम्] ।
दृष्टांताः संत्यसंख्येया मतिस्तद्वशवर्त्तिनी ।
किन्न कुर्युर्महीं धूर्ता विवेकरहितामिमां ॥
दुराग्रहग्रहग्रस्ते विद्वान् पुंसि करोतु किं ।
कृष्णपाषाणखंडेषु मार्दवाय न तोयदः ।
इति युक्तिर्यदेवात्र तदेव परमार्थसत् ।
यद्वानुदीप्तिवत्तस्याः पक्षपातोस्ति न क्वचित् ॥

प्रकाशं ।

श्रद्धा श्रेयोर्थिनां श्रेयः संश्रयाय न केवला ।
बुभुक्षितवशात्पाको जायेत किमुदुंबरे ॥
पात्रावेशादिवन्मंत्रादात्मदोषपरिक्षयः ।
दृश्येत यदि को नाम [जनः] क्लिश्येत संयमैः ॥
दीक्षाक्षणांतरात्पूर्वं ये दोषा[भावसं]भवाः ।
ते पश्चादपि दृश्यंते तन्न सा मुक्तिकारणं ॥
ज्ञानादवगमोर्थानां न तत्कार्यसमागमः ।
तर्षापकर्षयोगि स्याद्दृष्टमेवान्यथा पयः ॥
ज्ञानहीने क्रिया पुंसि परं नारभते फलं ।
तरोश्छायेव किं लभ्या फलश्रीर्नष्टदृष्टिभिः ॥
ज्ञानं पंगौ क्रिया बांधे [चांधे] निःश्रद्धे नार्थकृद्द्वयं ।
ततो ज्ञानक्रियाश्रद्धात्रयं तत्पदकारणं ॥

उक्तं च ।

हतं ज्ञानं क्रियाशून्यं हता चाज्ञानिनः क्रिया ।
धावन्नप्यंधको नष्टः पश्यन्नपि च पंगुकः ॥
निःशंकात्मप्रवृत्तेः स्याद्यदि मोक्षसमीक्षणं ।
ठकसूनाकृतं पूर्वं पश्चाल्लोकेष्वसौ भवेत् ॥
अव्यक्तनरयोर्नित्यं नित्यव्यापिस्वभावयोः ॥
विवेकेन कथं ख्यातिं सांख्यमुख्याः प्रचक्षते ।
सर्व्वं चेतासि भासेत वस्तुभावनया स्फुटं ।
तावन्मात्रेण[चेन्मुक्तिर्मु]क्तिः स्याद्विप्रलंभिनां ।

तदुक्तं ॥

पिहिते कारागारे तमसि च सूचीमुखाग्रनिर्भेद्ये ।

T

मयि च निमीलितनय[य]ने तथापि कांताननं व्यक्तं ॥
स्वभावांतरसंभूतिर्यत्र तत्र मलक्षयः ।
कर्त्तुं शक्यः स्वहेतुभ्यो मणिमुक्ताफलेष्विव ॥
तदहर्जु[र्ज्ञे]स्तनेहातो रक्षोदृष्टेर्भवस्मृतेः ।
भूतानव्ययनाज्जीवः प्रकृतिज्ञः सनातनः ॥
भेदोयं यद्यविद्या स्याद्वैचित्र्यं जगतः कुतः ।
जन्ममृत्युसुखप्रायैर्विवर्त्तैर्मानवर्तिभिः ॥
शून्यं तत्वमहं वादी साधयामि प्रमाणतः ।
इत्यास्थायां विरुध्येत सर्वशून्यत्ववादिता ॥
बोधो वा यदि वानंदो नास्ति मुक्तौ भवोद्भवः ।
सिद्धसाध्यतयास्माकं न काचित्क्षतिरीक्ष्यते ॥
पक्षवीक्षाविनिर्मोक्षे मोक्षे किं मांक्षि लक्षणं ।
नह्यभावन्यदुष्णत्वाल्लक्ष्म लक्ष्यं विचक्षणैः ।
किं च । सदाशिवेश्वरादयः संसारिणो मुक्ता वा संसारित्वे कथमाप्तता ।
मुक्तत्वे क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।
तत्र निरतिशयं सर्व्वज्ञबीजमिति पतंजलिजल्पितं ।
ऐश्वर्यमप्रतिहतं सहजो विरागस्तृप्तिर्निसर्गजनिता वशितेंद्रियेषु ।
आत्यंतिकं सुखमनावरणा च शक्तिर्ज्ञानं च सर्वविषयं भगवंस्तवैव ॥
इत्यवधूताभिधानं च न घटेत ।
अनेकजन्मसंततेर्यावदद्याक्षयः पुमान् ।
यद्यसौमुक्त्यवस्थायां कुतः क्षीयेत हेतवः [हेतुभिः] ।
बाह्ये ग्राह्ये मलापायात् सत्यस्वप्न इवात्मनः ।
तदा द्रष्टुः स्वरूपेस्मिन्नवस्थानममानकं ॥
नचायं सत्यस्वप्नोप्रसिद्धः स्वप्नाध्यायेऽतीव सुप्रसिद्धत्वात् ।
तथाहि ॥
यस्तु पश्यति रात्र्यंते राजानं कुंजरं हयं ।
सुवर्णं वृषभं गां च कुटुंबं तस्य वर्द्धते ।
यत्र नेत्रादिकं नास्ति न तत्र मतिरात्मनि ।
तन्न युक्तमिदं यस्मात्स्वप्नमध्येपि वीक्ष्यते ॥
जैमिन्यादेर्नरत्वेपि प्रकृष्येत मतिर्यदि ।
परा काष्ठाप्यतस्तस्याः क्वचित्खे परिमाणवत् ।
तुच्छो भावो न कस्यापि हानिर्दीपस्तमोन्वयी ।
धरादिषु धियो हानेर्विश्लेषसिद्धसाध्यता ॥

तदावृतिहतौ तस्य तपनस्येव दीधितिः ।
कथं न शेमुषी सर्व्वं प्रकाशयति वस्तु सत् ।
ब्रह्मैकं यदि सिद्धं स्यान्निस्तरंगं कुतश्च न ।
घटाकाशमिवाकाशे तत्रेदं लीयतां जगत् ॥

अथ मतं ॥

एक एव हि भूतात्मा देहे देहे व्यवस्थितः ।
एकधानेकधा चापि दृश्यते जलचंद्रवत् । तदयुक्तं ॥
एकः खेनेकधान्यत्र यथेंदुर्वेद्यते जनैः ।
न तथा वेद्यते ब्रह्म भेदोभ्योन्यदभेदभाक् ॥
अलमति विस्तरेण ।
आनंदो ज्ञानमैश्वर्यं वीर्यं परमसूक्ष्मता ।
एतदात्यंतिकं यत्र स मोक्षः परिकीर्त्तितः ॥
ज्वालालाबुकबीजादेः स्वभावादूर्द्ध्वगामिता ।
नियता च यथा दृष्टा मुक्तस्यापि तथात्मनः ॥
तथाप्यत्र तदावासे पुण्यपापात्मनामपि ।
स्वर्गश्वभ्रागमो न स्यादलं लोकांतरेण ते ॥ छ ॥ इत्युपासकाध्ययने
समस्तसमयसिद्धांतावबोधनो नाम प्रथमः कल्पः ॥ छ ॥

No. 274—(*continued*).

THE END OF SOMADEVA'S YASASTILAKAM.

च० श्रीमानस्ति स देवसंघतिलको देवो यशःपूर्वकः
शिष्यस्तस्य बभूव सद्गुणनिधिः श्रीनेमिदेवाह्वयः ।
तस्याश्चर्यतपःस्थितेस्त्रिनवतेर्जिष्णुर्महावादिनां
शिष्योभूदिह सोमदेव इति यस्तस्यैष कव्ये क्रमः ॥
विद्याविनेदे [ विनोद ]त्तनवासितहच्छुकेन
पुस्तं व्यलेखि विस[ विलस ]ल्लिपिर [ पि ह ] च्छुकेन ।
श्रीसोमदेवरचितस्य यशोधरस्य
सल्लोकमान्यगुणरत्नमहीधरस्य ॥
यस्याक्षरावलिरधीर[ वि ]लोचनस्य [ नाभि ]-
राकांक्ष्यते मदनशासनलेखनेषु ।
तस्मै विवेकिषु न यछतिर [ ति ह ]च्छुकाय
को नाम लेखकशिखामणिनामधेयम् ॥

Digitized by Google

शकनृपकालातीतसंवत्सरशतेष्वष्टस्वेकाशीत्यधिकेषु गतेष्वंकतः ॥ ८८१ ॥ सिद्धार्थसंवत्सरांतर्गतचैत्रमासमदनत्रयोदश्यां पांड्यसिंहलचोलचेरमप्रभृतीन् महीपतीन् प्रसाध्यामल्याटी [ध्यामलयाद्रि] प्रवर्द्धमानराज्यप्रभावे श्रीकृष्णराजदेवे सति तत्पादपद्मोपजीविनः समधिगतपंचमहाशब्दमहासामंताधिपतेश्चालुक्यकुलजन्मनः सामंतचूडामणिः [णेः] श्रीमदरिकेसरिणः प्रथमपुत्रस्य श्रीमद्वाद्यराज्यप्रवृद्धमानवसुंधरायां विनिर्मापितमिदम् ॥

इति सकलतार्किकलोकचूडामणेः श्रीमन्नेमिभगवतः शिष्येण सद्योनवद्यपद्यविद्याधरचक्रचक्रवर्त्तिशिखंडमंडनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते यशस्तिलकापरनाम्नि महाकाव्ये धर्मामृतमहोत्सवो नामाष्टम आश्वासः ॥

वर्णः पदं वाक्यविधिः समासो लिंगं क्रिया कारकमन्यतंत्रम् ।
छंदो रसो रीतिरलंक्रियार्थौ लोकस्थितिश्चात्र चतुर्दश स्युः ॥

## No. 275.

## THE TATTVÂRTHAVÂRTIKAM.

## तत्वार्थवार्तिकम्.

ॐ नमः सिद्धेभ्यः । ॐ नमः श्रीसरस्वत्यै । श्रीविद्यानंदिगुरुभ्यो नमः ॥

प्रणम्य सर्व्वविज्ञानमहास्पदमुरुश्रियम् ।
निर्द्धौतकल्मषं वीरं वक्ष्ये तत्वार्थवार्त्तिकम् ।

भा० श्रेयोमार्गप्रतिपित्सात्मद्रव्यप्रसिद्धेः ।

उपयोगस्वभावस्यात्मनः श्रेयसा योक्ष्यमाणस्य प्रसिद्धौ सत्यां तन्मार्ग्गप्रतिपित्सोत्पद्यते कथं

भा० चिकित्साविशेषप्रवृत्तिवत्

यथा व्याधिनिवृत्तिजफलश्रेयसा योक्ष्यमाणस्य चिकित्स[क]स्य प्रसिद्धौ चिकित्सा मार्गविशेषप्रतिपित्सोत्पद्यते तथात्मद्रव्यप्रसिद्धौ श्रेयोमार्गप्रतिपित्सेति तस्मात्साधीयसी मोक्षमार्गव्याख्या स्वायंभवीति............

श्रुतं द्विविधम् अंगप्रविष्टं अंगबाह्यं च । अंगप्रविष्टमाचारादिद्वादशभेदं गणधरैरनुस्मृतग्रंथरचनरूपम् ।

तद्यथा

आचारः सूत्रकृतं स्थानं समवायो व्याख्याप्रज्ञप्तिर्ज्ञातृधर्मकथा उपासकाध्ययनं अंतकृद्दशा अनुत्तरोपपादिकदशा प्रश्नव्याकरणं विपाकसूत्रं दृष्टिवाद इति

आचारे चर्याविधानं शुद्ध्यष्टकपंचसमितिगुप्तिविकल्पं कथ्यते

Digitized by Google

सूत्रकृते

ज्ञानविनयप्रज्ञापनाकल्प्याकल्प्यछेदोपस्थापनाव्यवहारधर्मक्रियाः प्ररूप्यंते

स्थाने ऽनेकाश्रयाणामर्थानां निर्ण्णयः क्रियते

समवाये सर्वपदार्थानां समवायश्चिंत्यते……

व्याख्याप्रज्ञप्तौ

षष्टिव्याकरणसहस्राणि किमास्ति जीवो नास्तीत्येवमादीनि निरूप्यंते

ज्ञातृधर्मकथायां आख्यानोपाख्यानां बहुप्रकाराणां कथनम्।

उपासकाध्ययने श्रावकधर्मलक्षणम्

संसारस्यांतः कृतो यैस्तेंतकृतः नमिमतंगसोमिलरामपुत्रसुदर्शनयमलीकवलीकनिष्कंबलपालांबष्टपुत्रा इत्येते दश वर्द्धमानतीर्थकरतीर्थे एवमृषभादीनां त्रयोविंशतेस्तीर्थेष्वन्येन्ये च दश दशानगाराः दारुणानुपसर्गान्निर्जित्य कृत्स्नकर्मक्षयादंतकृतः दशास्यां वर्ण्यंत इति अंतकृद्दशा अथवा अंतकृतां दशा अंतकृद्दशा तस्यामर्हदाचार्यविधिः सिध्यतां च।

उपपादो जन्मप्रयोजनं येषां ते इमे औपपादिकाः विजयवैजयंतजयंतापराजितसर्वार्थसिद्धाख्यानि पंचानुत्तराणि अनुत्तरेष्वौपपादिकाः अनुत्तरोपपादिकाः ऋषिदासवान्यसुनक्षत्रकार्त्तिकनंदनंदनशालिभद्राभयवारिषेणचिलातपुत्रा इत्येते दशवर्द्धमानातीर्थे………………………………………

आक्षेपविक्षेपैर्हेतुनयाश्रितानां प्रश्नानां व्याकरणं प्रश्नव्याकरणं। तस्मिंल्लौकिकवैदिकानामर्थानां निर्णयः।

विपाकसूत्रे। सुकृतदुःकृतानां विपाकश्चिंत्यते

दृष्टिवाद इति द्वादशमंगं।

कौकलकाएविद्धिकोशिकहरिश्मश्रुमान्कपिकरोमसहारितमुंडाश्वलादीनां क्रियावाददृष्टीनामशीतिशतं।

मरीचिकुमारकपिलोलूकगार्ग्यव्याघ्रभूतिवाद्वलिमाठरमौद्गल्यायनादीनामक्रियावाददृष्टीनां चतुरशीतिः। शाकल्यबाष्कलकुथुमिसात्यमुद्रिचारायणकंठमाध्यंदिनमौदपैप्पलादबादरायणांबष्टीकृदैरिकायनवसुजैमिन्यादीनामज्ञानिकुदृष्टीनां सप्तषष्ठिः। वसिष्ठपाराशरजतुकर्णिवाल्मीकिरोमर्षिसत्यदत्तव्यासैलापुत्रोपमन्यवैंद्रदत्तायस्थूणादीनां वैनयिकदृष्टीनां द्वात्रिंशदेषां दृष्टिशतानां त्रयाणां त्रिषष्ट्युत्तराणां प्ररूपणं निग्रहश्च दृष्टिवादे क्रियते स पंचविधः परिकर्म सूत्रं प्रथमानुयोगः पूर्वगतं चूलिका चेति। तत्र पूर्वगतं चतुर्दशप्रकारं। उत्पादपूर्वमग्रायणं। वीर्यप्रवादमस्तिनास्तिप्रवादं। ज्ञानप्रवादं। सत्यप्रवादमात्मप्रवादं कर्मप्रवादं। प्रत्याख्याननामधेयं। विद्यानुवादं। कल्याणनामधेयं। प्राणावायं। क्रियाविशालं। लोकबिंदुसारमिति ………………………………………

Digitized by Google

आरातीयाचार्यकृतांगार्थप्रत्यासन्नरूपमंगबाह्यम् ।

यद्गणधरशिष्यप्रशिष्यैरारातीयैरधिगतश्रुतार्थतत्त्वैः कालदोषादल्पमेधायुर्बलानां प्राणिनामनुग्रहार्थमुपनिबद्धं संक्षिप्तांगार्थवचनविन्यासं तदंगबाह्यं तदनेकविधं कालिकमुत्कालिकमित्येवमादिविकल्पात्स्वाध्यायकाले नियतकालं कालिकं अनियतकालमुत्कालिकं तद्भेदा उत्तराध्ययनादयः । अनेकविधाः ॥ ..............

ज्ञानदर्शनयोस्तत्त्वं नयानां चैव लक्षणम् ।
ज्ञानस्य च प्रमाणत्वमध्यायेस्मिन्निरूपितामिति ॥
इति तत्वार्थवार्तिकव्याख्यालंकारे प्रथमोध्यायः
जीयाच्चिरमकलंकब्रह्मा लघुहब्वनृपतिवरतनयः ।
अनवरतनिखिलविद्वज्जननुतविद्यः प्रशस्तजनहृद्यः ॥ .........

## No. 277.

## KUNDAKUNDÂCHÂRYA'S SHAṬPÂHUḌA, OR SHÂṬPRÂBHṚITAM, WITH THE COMMENTARY OF ŚRÎ-SRUTASÂGARASÛRI.

**षट्प्राभृतम्–सटीकम्–मू० कुन्दकुन्दाचार्यः टी० श्रुतसागरः.**

आ० दृग्वृत्तसूत्रबोधाख्यं भावमोक्षसमाह्वयं ।
षट्प्राभृतमिति प्राहुः कुंदकुंदगुरूदितं ॥ १ ॥

अथ श्रीविद्यानंदिभट्टारकपट्टाभरणभूतश्रीमल्लिभूषणभट्टारकाणामादेशात् प्रेरणाध्येषणावशात् बहुशः प्रार्थनावशात् कलिकालसर्वज्ञविरुदावलीविराजमानाः । श्रीमद्धर्म्मोपदेशकुशलाः । निजात्मस्वरूपप्राप्तिपंचपरमेष्ठिचरणान् प्रार्थयंतः सर्वजगदुपकारिणः उत्तमक्षमाप्रधानतपोरत्नसंभूषितहृदयस्थला भव्यजनजनकतुल्याः श्रीश्रुतसागरसूरयः ॥ श्रीकुंदकुंदाचार्यविरचितषट्प्राभृतग्रंथं टीकयंतः स्वरुचिविरचितम[मत ]दृष्टयः सम्यग्दर्शनप्राभृतस्यादौ परापरगुरुप्रवाहमंगलप्रसिद्धप्रार्थनपराः ॥ नांदीसूत्रस्य विवरणमाहुः ॥ गाथा ॥

काऊण नमुक्कारं जिणवरवसहस्स वद्धमाणस्स ।
दंसणमग्गं वोछामि जहाकम्मं समासेण ॥ १ ॥

अष्टपदानांदी वोछामि वक्ष्यामि कथयिष्यामि । कः कर्त्ता अहं श्रीकुंदकुंदाचार्यः ।

कं कर्म्म तापन्नं दंसणमग्गं सम्यग्दर्शनस्वरूपं कथं वक्ष्यामि । जहाकम्मं यथाक्रमं अनुक्रमेण संक्षेपेण किंकृत्वा पूर्वं वद्धमाणस्स नमुक्कारं ।

काऊण वर्द्धमानस्य प्रियकारिणीवल्लभश्रीसिद्धार्थमहाराजनंदनस्यांतिमतीर्थकरपरमदेवस्य भरतक्षेत्रस्थविदेहदेशसंबंधिश्रीकुंडपुरपत्तनोत्पन्नस्य सुवर्णवर्णशरी-

Digitized by Google

रस्य किंचिदधिकद्वासप्ततिवर्षपरमायुषः सप्तहस्तोन्नतशरीरस्य निर्भयत्वरंजितसंग-मनामधेयदेवकृतस्तवनस्य वीरवर्द्धमानमहतिमहावीरसन्मतिनामपंचकप्रसिद्धस्य। नमुक्कारं नमोस्त्विति वचनेन मनसा कायेन वचसाष्टांगं प्रणामं काऊण कृत्वा। कथंभूतस्य वर्द्धमानस्य जिणवरवसहस्स जिणवराणां श्रीगौतमादिगणधरदेवादीनां मध्ये वृषभस्य श्रेष्ठस्य इत्यनेन विशेषणेन प्रथमतीर्थंकरश्रीमदादिनाथादीनामपि सर्व्वतीर्थंकरसमुदायस्यापि नमस्कारः कृतो भवतीति वेदितव्यं ॥

दंसणमूलो धम्मो उवइठो जिणवरेहिं सिस्साणं।
तं सोऊन सकण्णे दंसणहीणो न वंदिव्वो ॥ २ ॥

दंसणमूलो धम्मो दर्शनं सम्यक्त्वं मूलं अधिष्ठानमाधारः प्रासादस्य गर्त्तापूरवत्। वृक्षस्य पातालगतजटावत् प्रतिष्ठा यस्य धर्मस्य सद्दर्शनमूलं। एवंगुणविशिष्टो धर्मो दयादिलक्षणः ॥ जिणवरेहिं तीर्थंकरपरमदेवैरपरकेवलिभिश्च उवइठो। उपदिष्टः प्रतिपादितः। केषामुपदिष्टः। सिस्साणं शिष्याणां गणधरदेवचक्रधरवज्रधरादीनां भव्यवरपुंडरीकाणां तं सोऊण सकण्णे। तं धर्मं श्रुत्वा आकर्ण्य स्वकर्णे निजश्रवणे आत्मशब्दगृहे ॥ दंसणहीणो न वंदिव्वो दर्शनहीनः सम्यक्त्वरहितो न वंदितव्यो नो वंदनीयो न माननीयः ॥ तस्य अन्नदानादिकमपि न देयं ॥ छ ॥ मिथ्यादृग्भ्यो ददद्दानं दाता मिथ्यात्ववर्द्धकः। अथ कोसौ दर्शनहीनः इति चेत्। तीर्थंकरपरमदेवप्रतिमां न मानयंति। न पुष्पादिना पूजयंति किमिति न पूजयंति। मिथ्यादृष्टयः किल एवं वदंते। तीर्थंकरपरमदेवः किं देवान् पूजयति तथा वयमपि न पूजयामः। पंचमकाले किल मुनयो न वर्त्तंते तदयुक्तं ॥

काव्यं ॥ भर्त्तारः कुलपर्वता इव भुवो मोहं विहाय स्वयं
रत्नानां निधयः पयोधय इव व्यावृत्तवित्तस्पृहाः।
स्पृष्टाः कैरपि नो नभोविभुतया विश्वस्य विश्रांतये
संत्यद्यापि चिरंतनांतिकचराः संतः कियंतोप्यमी ॥

मिथ्यादृष्टयः किल वदंति व्रतैः किं प्रयोजनं आत्मैव पोषणीयस्तस्य दुःखं न दातव्यं ॥ मयूरपिछं किल रुचिरं न भवति। सूत्रपिछं रुचिरं मयूरपिछं आभेटनं छौतिर्भवति तदसत्यं उक्तं च। भगवति आराधनाग्रंथे

रजसेदाणमगहणं मद्दवसुकुमालदा लहुत्तं च।
जत्थेदे पंचगुणा तं पडिलिहणं पसंसंति।

शासनदेवता न पूजनीयाः। आत्मैव देवो वर्त्तते अपरः कोपि देवो नास्ति। वीरादनंतरं किल केवलिनोष्ट जाताः। न तु त्रयः महापुराणादिकं किल विकथा इत्यादि ये उत्सूत्रं मन्वते ते मिथ्यादृष्टयश्चार्वाका नास्तिकास्ते यदि जिनसूत्रमुल्लंघंते सदा आस्तिकैर्युक्तिवचनेन निषेधनीयाः। तथापि यदि कदाग्रहं

Digitized by Google

न मुंचंति । तदा समस्तैरास्तिकैरुपानद्भिर्गूथलिप्ताभिर्मुखे ताडनीयाः । तत्र पापं नास्ति ॥ गाथा ॥

दंशणभठा भठा दंसणभठस्स नच्छि निव्वाणं ।
सिज्झंति चरियभठा दंसणभठा न सिज्झंति ॥

दर्शनभ्रष्टा भ्रष्टाः सम्यग्दर्शनात्पतिताः पतिता उच्यंते । दर्शनभ्रष्टस्य नास्ति निर्व्वाणं सम्यग्दर्शनात्पतितस्य सर्वकर्मक्षयलक्षणो मोक्षो न भवति किं तु सम्यग्दर्शनात्पतिता नरकादिगतिषु परितो दीर्घकालं पर्यटंति ॥ सिझ्यंति चरियभठा सिद्ध्यंति आत्मलब्धिमनुभवंति । मोक्षं न प्राप्नुवंति के ते चारियभठा चारित्रात्पतिताः । यतिश्रावकलक्षणब्रह्मचर्य्यप्रत्याख्यानाभ्यां स्खलिताः । सामग्रीं प्राप्य श्रेणिकमहाराजादिवत् । स्तोकेन कालेन मोक्षं प्राप्नुवंति ॥

दंसणभठा न सिज्झंति । सम्यग्दर्शनात्पतिता न सिद्ध्यंति मोक्षं न प्राप्नुवंति । भव्यसेनादिवत् । वशिष्ठऋष्यादिवच्च संसारे निमज्जंति इति ज्ञात्वा श्रुतकीर्ति-श्रेयांसादिप्रमाणपुरुषैरुपवर्त्तितं दानपूजादिसत्कर्म न निषेधनीयं । आस्तिकभावेन सदा स्थातव्यमित्यर्थः ॥

च० एवं जिणपण्णत्तं मोक्खस्स पाहुडं सुलभत्तीए ॥
जो पढइ सुणइ भावइ सो पावइ सासयं सोक्खं ॥ ६ ॥

एवं जिणपण्णत्तं एवममुना प्रकारेण जिनप्रज्ञप्तं सर्वज्ञवीतरागभावितं मोक्खस्स य पाहुडं सुभत्तीए मोक्षस्य परमनिर्वाणपदस्य प्राभृतसारमिदं शास्त्रं सुष्टु अतिशयेन भक्त्या परमधर्मानुरागेण जो पढइ सुणइ भावइ । यः आसन्नभव्यो जीवः पठति जिव्हाग्रे करोति यश्च भव्यजीवः शृणोत्याकर्णयति च मोक्षाभिलाषुको जीवो भावयति एतच्छास्त्रं यस्यां रोचते सो पावइ सासयं सोक्खं । स जीवः परममुनीश्वरः प्राप्नोति लभते शाश्वतमविनश्वरं सौख्यं निजात्मोत्थं परमात्मानंदलक्षणं सौख्यं ॥ ६ ॥

नानाशास्त्रमहार्णवैकतरणे यद्बुद्धिरिद्धिश्रिया
पूर्वा पुण्यकविप्रमोदजननी सरीव नौकायते ।
यत्पादांबुजयुग्ममाप्य मुनिभिर्भृंगैरिवापीयते ।
स श्रीमान् श्रुतसागरो विजयतामिनस्तमोहर्प्यतिः ॥ १ ॥
श्रीमत्स्वामिसमंतभद्रममलं श्रीकुंदकुंदाह्वयं
यो धीमानकलंकभट्टमपि च श्रीमत्प्रभेंदुप्रभं ।
विद्यानंदमपीक्षितुं कृतमनाः श्रीपूज्यपादं गुरुं
वीक्षेत श्रुतसागरं स विनयाच्चैविद्यधीमत्स्तुतं ॥ २ ॥
श्रीमल्लिभूषणगुरोर्वचनादलंघ्यान्मुक्तिश्रिया सह समागममिछतेयं ।
षट्प्राभृते सकलसंशयशत्रुहंत्री टीका कृता कृतधिया श्रुतसागरेण ॥३॥

इति श्रीपद्मनंदिकुंदकुंदाचार्यवक्रग्रीवाचार्यगृध्रपिच्छाचार्यनामपंचकविराजितेन चतुरंगुलाकाशगमनर्द्धिना पूर्वविदेहपुंडरीकिणीनगरवंदितसीमंधरापरनामस्वयंप्रभजिनेन—ज्ञानसंबोधितभरतभव्यवर्षजीवेन श्रीजिनचंद्रसूरिभट्टारकपट्टाभरणभूतेन कलिकालसर्वज्ञेन विरचितषट्प्राभृतग्रंथे सर्वमुनिमंडलीमंडितेन कलिकालगौतमस्वामिना पं. श्रीपद्मनंदिदेवेंद्रकीर्तिविद्यानंदिपट्टभट्टारकेणानुमतेन सकलविद्वज्जनसमाजसंमानितेन उभयभाषाकविचक्रवर्त्तिना श्रीविद्यानंदिगुर्वतेवासिना सूरिवरश्रीश्रुतसागरेण विरचिता मोक्षप्राभृतटीका परिसमाप्ता षष्टः परिछेदः समाप्तः समाप्तोयं ग्रंथः

No. 278.

## THE SAMAYASÂRAPRÂBHṚITAM WITH THE COMMENTARY BY AMṚITACHANDRASÛRI.

## समयसारप्राभृतम् सटीकम्—टी० अमृतचंन्द्र सूरिः.

टी० आ०

ॐ नमः परमात्मने नमोनेकान्ताय ॥

नमः समयसाराय स्वानुभूत्या चकासते ।
चित्स्वभावाय भावाय सर्वभावान्तरच्छिदे ॥

मू० आ० वंदित्तु सव्वसिद्धे धुवमचलमणोवमं गइं पत्ते ।
वोच्छामि समयपाहुडमिणमो सुयकेवलीभणियं ॥ १ ॥
वंदित्वा सर्वसिद्धान् ध्रुवामचलामनौपम्यां गतिं प्राप्तान् ।
वक्ष्यामि समयप्राभृतमिदं श्रुतकेवलिभणितं ॥

च०

ये ज्ञानमात्रनिजभावमयीमकंपां
भूमिं श्रयंति कथमप्यपनीतमोहाः ।
ते साधकत्वमवगम्य भवन्ति सिद्धा
मूढास्त्वमूमनुपलभ्य परिभ्रमंति ॥
स्याद्वादकौशलसुनिश्चलसंयमाभ्यां
यो भावयत्यहरहः स्वमिहाययुक्तः ।
ज्ञानक्रियाजयपरस्परतीव्रमैत्री-
पात्रीकृतः श्रयति भूमिमिमां स एकः ॥
चित्पिंडचंडिमविलासिविकाशहासः
शुद्धप्रकाशभरनिर्भरसुप्रभातः ।
आनन्दसुस्थितसदास्खलितैकरूप-



Digitized by Google

स्तस्यैव चायमुदयत्यचलार्चिरात्मा ॥
स्याद्वाददीपितलसन्महति [ सि ] प्रकाशे
शुद्धस्वभावमहिमन्युदिते मयाति [ममांतः] ।
किं बंधमोक्षपथपातिभिरन्यभावै-
र्नित्योदयः परमयं स्फुरतु स्वभावः ॥
चित्रात्मशक्तिसमुदायमयोयमात्मा
सद्यः प्रणश्यति नयेक्षणखंडयमानः ।
तस्मादखंडमनिराकृतखंडमेक-
मेकान्तशांतमचलं चिदहं महोस्मि ॥

न द्रव्येण खंडयामि । न क्षेत्रेण खंडयामि । न कालेन खंडयामि । न भावेन खंडयामि । सुविशुद्धएको ज्ञानमात्रो भावोस्मि ।

योयं भावो ज्ञानमात्रोहमस्मि ज्ञेयो ज्ञेयाज्ञानमात्रः स नैव ।
ज्ञेयो ज्ञेयं ज्ञानकल्लोलवल्गत् ज्ञानज्ञेयज्ञातृमद्वस्तुमात्रः ॥
क्वचिल्लसति मेचकं क्वचिदमेचकामेचकं
क्वचित्पुनरमेचकं सहजमेव तत्त्वं मम ।
तथापि न विमोहयत्यमलमेधसां तन्मनः
परस्परसुसंसहतप्रकटशक्तिचक्रं स्फुरत् ॥
इतो गतमनेकतां दधदितः सदाप्येकता-
मितः क्षणविभंगुरं ध्रुवमितः सदैवोदयात् ।
इतः परमविस्तृतं धृतमितः प्रदेशैर्निजै-
रहो सहजमात्मनस्तादिदमद्भुतं वैभवं ॥
कषायकलिरेकतः स्खलितशांतिरस्त्येकतो
भवोपहतिरेकतः स्पृशति मुक्तिरप्येकतः ।
जगत्त्रितयमेकतः स्फुरति चिच्चकास्त्येकतः
स्वभावमहिमात्मनो विजयतेद्भुता(द)द्भुतः ॥
जयति सहजतेजः पुंजमज्जत्त्रिलोकी-
स्खलदखिलविकल्पोप्येक एव स्वरूपः ।
स्वरसविसरपूर्णाच्छिन्नतत्त्वोपलंभः
प्रसभनियमितार्चिश्चिच्चमत्कार एषः ॥
अविचलितचिदात्मन्यात्मनात्मानमात्म-
न्यनवरतनिमग्नं धारयत्ध्वस्तमोहं ।
उदितममृतचंद्रज्योतिरेतत्समंता-
ज्ज्वलतु विमलपूर्णं निःसपत्नस्वभावं ॥

Digitized by Google

इति समयसारव्याख्यायामात्मख्यातौ नवमोंकः ॥
यस्माद्वैतमभूत्पुरा स्वपुरयोर्भूतं यतोवांतरं
रागद्वेषपरिग्रहे सति यतो जातं क्रियाकारकैः ।
भुंजाना च यतोनुभूतिरखिलं खिन्ना क्रियायाः फलं
तद्विज्ञानघनौघममग्नमधुना किंचिन्न किंचित्किल ॥
स्वशक्तिसंसूचितवस्तुतत्त्वैर्व्याख्याकृतेयं समयस्य शब्दैः ।
स्वरूपगुप्तस्य न किंचिदस्ति कर्तव्यमेवामृतचन्द्रसूरेः ॥
इत्यात्मख्यातिनामसमयसारव्याख्या समाप्ता ॥

## A DIGAMBARA PAṬṬÂVALI, TAKEN FROM A COPY OF THE PÂKSHIKAPRATIKRAMAṆAKRIYÂ (ÂVAŚYAKASÛTRA).

**पाक्षिकप्रतिक्रमणक्रियांतर्गतगुरुनामावलिः.**

थोसामीत्यादि ॥
श्रीमानशेषनरनायकवंदितांघ्रिः
श्रीगुप्तिगुप्त इति विश्रुतनामधेयः ।
यो भद्रबाहुमुनिपुंगवपट्टपद्म-
सूर्यः स वो दिशतु निर्मलसंघवृद्धिम् ॥ १ ॥
श्रीमूलसंघेजनि नंदिसंघस्तस्मिन् बलात्कारगणोतिरम्यः ।
तत्राबभौ पूर्वपदांस[श]वेदी श्रीमाघनंदिर्नरदेववंद्यः ॥ २ ॥
पट्टे तदीये मुनिमान्यवृत्तौ जिनादिचंद्रः समभूदतंद्रः ।
ततोभवत् पंचसुनामधामा श्रीपद्मनंदिर्मुनिचक्रवर्त्ती ॥ ३ ॥
आचार्यः कुंदकुंदाख्यो वक्रग्रीवो महामतिः ।
एलाचार्यो गृध्रपिच्छः पद्मनंदीति तन्यते ॥ ४ ॥
तत्वार्थसूत्रकर्त्तृत्वात् प्रकटीकृतसन्मतिः ।
उमास्वातिपदाचार्यो मिथ्यात्वतिमिरांशुमान् ॥ ५ ॥
लोहाचार्यस्ततो जातो जाध[त]रूपधरोमरैः ।
सेवनीयः समस्तार्थविबोधनविशारदः ॥ ६ ॥
ततः पट्टद्वयी जाता प्राच्युदीच्युपलक्षणात् ।
तेषां यतीश्वराणां स्युर्नामानीमानि तत्वतः ॥ ७ ॥
यशःकीर्त्तिर्यशोनंदी देवनंदी महामतिः ।
पूज्यपादापराख्येयो गुणनंदी गुणाकरः ॥ ८ ॥
वज्रनंदी वज्रवृत्तिस्तार्किकाणां महेश्वरः ।

Digitized by Google

कुमारनंदी लोकेंदुः प्रभाचंद्रो वचोनिधिः ॥ ९ ॥
नेमिचंद्रो भानुनंदी सिंहनंदी जटाधरः ।
वसुनंदी वीरनंदी रत्ननंदी रतीशभित् ॥ १० ॥
माणिक्यनंदी मेघेंदुः शांतिकीर्त्तिर्महायशाः ।
मेरुकीर्त्तिर्महाकीर्त्तिर्विश्व[ष्णु]नंदी विदांवरः ॥ ११ ॥
श्रीभूषणः शीलचंद्रः श्रीनंदी देशभूषणः ।
अनंतकीर्त्तिर्धर्मादिनंदी नंदितशासनः ॥ १२ ॥
विद्यानंदी रामचंद्रो रामकीर्त्तिरनिंद्यवाक् ।
अभयेंदुर्नरचंद्रो नागचंद्रः स्थिरव्रतः ॥ १३ ॥
नयनंदी हरिचंद्रो महीचंद्रो मलोज्झितः ।
माधवेंदुर्लक्ष्मीचंद्रो गुणकीर्त्तिर्गुणाश्रयः ॥ १४ ॥
गुणचंद्रो वासवेंदुर्लोकचंद्रः स्वतत्त्ववित् ।
त्रैविद्यः श्रुतकीर्त्याख्यो वैयाकरणभास्करः ॥ १५ ॥
भावचंद्रो महाचंद्रो माघचंद्रः क्रियाग्रणीः ।
ब्रह्मनंदी शिवनंदी विश्वचंद्रस्तपोधनः ॥ १६ ॥
सैद्धांतिको हरिनंदी भावनंदी मुनीश्वरः ।
सुरकीर्त्तिर्विद्याचंद्रः सूरचंद्रः श्रियांनिधिः ॥ १७ ॥
माघनंदी ज्ञाननंदी गंगकीर्त्तिर्महत्तमः ।
सिंहकीर्त्तिर्हेमकीर्त्तिश्चारुनंदी मनोज्ञधीः ॥ १८ ॥
नेमिनंदी नाभिकीर्त्तिर्नरेंद्रादियशःपरम् ।
श्रीचंद्रः पद्मकीर्तिश्च वर्द्धमानमुनीश्वरः ॥ १९ ॥
अकलंकश्चंद्रगुरुर्ललितकीर्त्तिरुत्तमः ।
त्रैविद्यः केशवश्चंद्रश्चारुकीर्त्तिः सुधर्मणीः ॥ २० ॥
सैद्धांतिकोभयकीर्त्तिर्वनवासी महातपाः ।
वसंतकीर्त्तिर्व्याघ्राहिसेवितः शीलसागरः ॥ २१ ॥
तस्य श्रीवनवासित[नः]स्त्रिभुवनप्रख्यातकीर्त्तेरभू-
च्छिष्योनेकगुणालयः शमयमध्यानापगासागरः ।
वादींद्रः परवादिवारणगणप्रागल्भ्यविद्रावणे
सिंहः श्रीमति मंडपेतिविदितस्त्रैविद्यविद्यास्पदम् ॥ २२ ॥
विशालकीर्त्तिर्वरवृत्तमूर्त्तिस्ततो महात्मा शुभकीर्त्तिदेवः ।
एकांतराद्युग्रतपोविधाता धाता च सन्मार्गविधेर्विधाने ॥ २३ ॥
श्रीधर्मचंद्रोजनि तस्य पट्टे हम्मीरभूपालसमर्चनीयः ।
सैद्धांतिकः संयमसिंधुचंद्रः प्रख्यातमाहात्म्यकृतावतारः ॥ २४ ॥

Digitized by Google

तत्पट्टेजनि रत्नकीर्त्तिरनघः स्याद्वादविद्याम्बुधि-
र्नानादेशविवृत्तशिष्यनिवहः प्राच्यां [र्च्यो] घ्रियुग्मो गुरुः ।
धर्माधर्मकथासु रक्तधिषणः पापप्रभाबाधको
बालब्रह्मतपःप्रभावमहितः कारुण्यपूर्णाशयः ॥ २५ ॥
पट्टे श्रीरत्नकीर्त्ति[र्त्ते]रनुपमतपसः पूज्यपादीयशास्त्र-
व्याख्याविख्यातकीर्त्तिर्गुणगणनिलयः सत्क्रियासारचंचुः ।
श्रीमानानंदधामा प्रतिबुधनुत——मानसंदायिवादो
जीयादाचंद्रतारं नरपतिविदितः श्रीप्रभाचंद्रदेवः ॥ २६ ॥
हंसो ज्ञानमरालिकासमसमाश्लेषप्रभूताद्भुता-
नंदः क्रीडति मानसेतिविशदे यस्यानिशं सर्वतः ।
स्याद्वादामृतसिंधुवर्द्धनविधौ श्रीमत्प्रभेंदुप्रभोः
पट्टे सूरिमतल्लिका स जयतात् श्रीपद्मनंदी मुनिः ॥ २७ ॥
महाव्रतिपुरंदरः प्रशमदग्धरागांकुरः
स्फुरत्परमपौरुषस्थितिरशेषशास्त्रार्थवित् ।
यशोभरमनोहरीकृतसमस्तविश्वंभरः
परोपकृत[ति]तत्परो जयति पद्मनंदीश्वरः ॥ २८ ॥
स्याद्वादामृतसिंधुवर्द्धनकरः सौम्यैर्गुणैर्वल्लभः
षट्तर्कागमजैनशासनमहाल्ल[ल]ब्धप्रतिष्ठोत्सवः ।
पट्टे श्रीमुनिपद्मनंदिविदुषः कल्याणलक्ष्मीकरः
सोयं श्रीशुभचंद्रदेवमुनिपो भव्यैर्जनैर्वंदितः ॥ २९ ॥
पट्टे श्रीशुभचंद्रदेवगणिनः श्रीपद्मनंदीश्वर-
स्तर्कव्याकरणादिग्रंथ [गुंफ] कुशलो विख्यातकीर्त्तिर्गुणी ।
श्रीमान् श्रीजिनचंद्रसूरिरभवद्रत्नत्रयालंकृतो
हेयादेयविचारमार्गचतुरश्चारित्रचूडामणिः ॥ ३० ॥
प्रकटितजिनमार्गो ध्वस्तमोहांधकारो
जिननयपरवादी सप्तभंगेद्धबोधः ।
विधुतविषयसंगः स्वीकृतात्मप्रसंगो
जयति सततधामा श्रीजिनेंदुर्यतींद्रः ॥ ३१ ॥
तत्पट्टोदयभूधरेजनि मुनिः श्रीमत्प्रभेंदुर्वशी
हेयादेयविचारणैकचतुरो देवागमालंकृतौ ।
भेयांभोजदिवाकरादिविविधे तर्के च चंचुश्चणो ।
जैनेंद्रादिकलक्षणप्रणयने दक्षोनुयोगेषु च ॥ ३२ ॥
त्यक्त्वा सांसारिकीं भूतिं किंपाकफलसंनिभाम् ।

Digitized by Google

चितारत्ननिभां जैनीं दीक्षां संप्राप तत्ववित् ॥ ३३ ॥
शब्दब्रह्मसरित्पतिं स्मृतिबलादुत्तीर्य यो लीलया
षट्तर्कावगमार्ककर्कशगिरा जित्वाखिलान् वादिनः ।
प्राच्यां दिग्विजयीभवन्निव विभुर्जैनप्रतिष्ठाकृते
श्रीसंमेदगिरौ सुवर्णकलशैः पट्टाभिषेकः कृतः ॥ ३४ ॥
श्रीमत्प्रभाचंद्रगणेंद्रपट्टे भट्टारकः श्रीमुनिचंद्रकीर्त्तिः ।
संस्नापितो योवनिनाथवृंदैः संमेदनाम्नीह गिरींद्रमूर्ध्नि ॥ ३५ ॥
जीयाच्छ्रीविधुकीर्त्तिपट्टसुधरः प्रोद्यद[द्र]हःसन्मणिः
सर्वज्ये वरवंशशुद्धजलधौ चंद्रश्चिरं चित्रमान् ।
तर्कव्याकरणादिनीतिनिपुणो देवेंद्रकीर्त्तिः कृती
सद्भट्टारक एव सर्वगुणभृद्भूपाललब्धाज्ञकः ॥ ३६ ॥
श्रीचंद्रकीर्त्तेः पदसंवरांथोकज क[राब्धौ कुजन्क]लापी सकलो हरित्सु ।
देवेंद्रकीर्तिर्धृतकांतकीर्तिः भट्टारको भट्टविवृत्तवादः ॥ ३७ ॥
पट्टे श्रीदिविजेंद्रकीर्त्तिगणिनो निष्कादिकुंभांबुभिः
स्नातः सूरिनरेंद्रकीर्त्तिरमते स्त्रीगीतकीर्त्यंकितः ।
स्वस्तिव्यस्तसमस्तशास्त्रकुशलार्हद्भक्तिशक्तोनिशं
जीव्याद्ब्रह्मयुगं जगद्गुरुमतांभोराशिशीतांशुभः ॥ ३८ ॥
क्षोणीमंडलमंडनामलगुणालंकारहारस्य च
चारित्रादियशोहिमांशुकिरणैस्तस्य क्षमा शोभते ।
सर्पत्सौगतसर्पदर्पदमनं विद्याविनोदं दध-
ज्जीयात् सूरिनरेंद्रकीर्त्तिरिह सो [रनिशं] नंद्यादिसंघेनघे ॥ ३९ ॥
गांभीर्यनिर्जितपयोध[धि]रपि स्थिराया
म[मो]हौघदारुदहनानलतामराय [मवाप] ।
भव्यं तनोतु सुधियां च नरेंद्रकीर्त्तिः
सुग्रीवभूपमन[ति]रंजनकांतकीर्त्तिः ॥ ४० ॥
पद्मनंदी गुरुर्जातो बलात्कारगणाग्रणीः ।
पाषाणघटिता येन वादिता श्रीसरस्वती ॥ ४१ ॥
उज्जयंतगिरौ गच्छः [स्वछः] सारस्वतोभवत् ।
अतस्तस्मै मुनींद्राय नमः श्रीपद्मनंदिने ॥ ४२ ॥
इती श्रीमूलसंघे भट्टारक श्रीभद्रबाह्वादिगुरूणां नामाववलिः समाप्ता ॥

Digitized by Google

ᴀTALOGUE OF VEDIC BOOKS BELONGING TO H. H. THE MAHARAJA OF ALWAR.

| ग्रन्थ नंबर. | ग्रन्थनाम. | कर्त्तृनाम. | पत्राणि. | संवत्. | असंपूर्णादि-वाच्यम्. |
|---|---|---|---|---|---|
| | **ऋग्वेदः** | | | | |
| | **आश्वलायनशाखा.** | | | | |
| १ | संहिता—अष्टकाः १-८ ...... | ......... | ७१८ | ... | |
| २ | सैव—अष्टकाः १-४............ | ......... | २१३ | ... | खंडिता. |
| ३ | सैव ........................... | ......... | ४८ | ... | खं० |
| ४ | सर्वानुक्रमणिका ............. | ......... | ४४ | ... | |
| ५ | सैव ........................... | ......... | ३८ | ... | |
| ६ | सैव ........................... | ......... | ३७ | ... | |
| ७ | सुदर्शनसंहिता .............. | ......... | १३८ | ... | |
| ८ | पदपाठः—अष्टकाः १-८ ...... | ......... | १०३८ | ... | |
| ९ | स एव अ० १-४,४,५,६,६,८,... | ......... | ८६१ | ... | |
| १० | स एव अष्टमोष्टकः ........... | ......... | ११९ | ... | खं०. |
| ११ | ऐतरेय ब्राह्मणपञ्चिका अ० १-८ | ......... | २८८ | ... | |
| १२ | सैव—अ० १-८ ............... | ......... | २४५ | ... | |
| १३ | ब्राह्मणम्........................ | ......... | ११८ | ... | जीर्णम्. |
| १४ | आरण्यकम् .................. | ......... | ७१ | ... | |
| १५ | तदेव .......................... | ......... | ९२ | ... | |
